तुऊचियङ्कृ्थेतिस्यात् तस्मात्स्थानिवत्त्वेनयलः पित्त्वेभ्युपगतेऽवकृ्त्येत्यादावतिप्रसंगवारणायपितः सार्वधातुकस्यईडागमइतिव्याख्यातव्यमेव तथाचवृत्तौ
तिरित्यत्रईडागमप्रवृत्त्याशित्वंचरितार्थमितिकैश्चिद्यदुक्तंतदपिसम्यगेवेति असिद्धवदत्राभात् वतकरणंप्रतिपत्तिलाघवायअन्यथासिद्धेअसिद्धइतिप्रयुज्यमान
मनुपपन्नंसत् सामर्थ्यादसिद्धवदितिकल्पनीयंस्यात् यथाराजभिन्नेपुरोहितेराजायमितिप्रयोगोराजवदितिकर्मचित् कल्पयतिराजवदंपुरोहितइत्युक्तेतुलघुत्र
तिपत्तिर्भवति तयाचागत्याश्वत्वतुकोरसिद्धइत्यत्रासिद्धवदितिकल्पते असंयोगाल्लिट् किदित्यत्रापिकिद्वदित्यगत्यैवकल्पतेइतिज्ञेयम् आभादित्यभिविधावाङ्भा
धिकारमभिव्याप्येत्यर्थः अधिकारश्चायम् अत्रग्रहणंसमानाश्रयप्रतिपत्त्यर्थं आभाङ्ग्रहणंविषयनिर्देशार्थम् भाधिकारस्यावधिलाभस्तुअंगस्य प्रत्ययपरश्चेत्यादावि
वक्ष्याख्यानेनैवसिध्यति एवंचानुदात्तोपदेशेत्यत्रास्यो पस्थानेसत्ययमर्थोभवति एषामनुनासिकस्यलोपःस्यात् झलादोङ्किति परेसत्यासिद्धोभवति अत्रऊ
लादिङ्किदाश्रित्यैवयदाभीयंप्राप्नोतितस्मिन्कर्तव्येइति जंगहि जंघहिअतोहेरिति लुग्नभवति अनुनासिकलोपस्यहिशब्दाश्रितत्वेनासिद्धत्वात् नन्वस्या
धिकारत्वेयत्रयत्रोपस्थानंततएवारभ्ययदाभीयम् तस्मिन्नेवकर्तव्येअसिद्धत्वंस्यात् नतुततः पूर्वस्मिन्नपि ततश्चघसोरित्येवंपूर्वस्मिन्नपिविधेकर्तव्येनासि
द्धंस्यादितिचेत्भवेदयंदोषः।शब्दाधिकारेअर्थाधिकारश्चायम् ततश्चेहश्नान्नलोपइत्यवधिर्निर्णीतःसएवप्रतिसूत्रमुपतिष्ठतेतदेतत्सकलमभिप्रेत्याह
इतऊर्ङ्मिति अत्रापिशास्त्रासिद्धत्वमेवआकरेस्थितमतेनएषिशाधीत्यत्रस्थानिनोमलंतत्वबुद्धेरनिवर्तितत्वात्तन्निबंधनंहमलभ्योहेर्द्धिरितिधिर्लंसिद्ध्यति।
प्राचोक्तकार्यासिद्धत्वपक्षेतुनसिद्ध्यति देवदत्तस्यहंतरिहतेदेवदत्तस्य जीवनंनेतिन्यायेनएत्वविधिना मलबुद्धेर्निवर्तितायांपश्चादेत्वबुद्धिनिवर्तनेपिधित्वका
र्य्यस्याप्रवृत्तेरित्याहुः समानाश्रयेइतिकिम् पपुषःचिच्युषःलुलुवुषःद्रुहपाधातोःचिजोलूञश्चपरस्यवसोर्यत्संप्रसारणम् तदातोलोपइटिचेत्यालोपेएरनेकाच
इतियण्प्रवृत्तेरित्याहुः आल्लोपादीनिहिक्ङितीत्याश्रयत्वात् नचवहिरंगत्वेनासिद्धतास्तितिशंक्यम् नाजानंतर्य्यइति
निषेधात् वाहऊठसूत्रस्थवहिरंगपरिभाषायाअप्याभीयत्वेनआल्लोपादिष्वकर्तव्येष्वसिद्धत्वाच्चननोक्तपरिभाषायाआल्लोपादीनांचसमानाश्रयत्वेनेतिशंक्यम् व
सोःसंप्रसारणेकृतेह्यजाद्याश्रयेणाल्लोपादीनिप्रवर्त्ततेतेष्वकर्तव्येष्वसंप्रसारणस्यासिद्धत्वायतद्विषयेवहिरङ्गपरिभाषापिप्रवर्ततइतितेषांतन् सत्वादितिदिक् वि

स्पष्टमेवाकरदृशाम् प्रयुंजतेचकर्मण्यपिअकारंकवयः तस्मातपन्नविभरांवभूवे विभावरीभिर्विभरांवभूविरेइत्यादि।एतत् प्रक्रियाप्रसादग्रंथदूषणंमनोरमायां स्थितम् अत्रनव्याः स्तिपः शित्वसामर्थ्यादेवेहशपः प्रवृत्तिरितियदुक्तंतन्नापिवतिग्लायतिरित्यादौपिवाद्यादेशप्रवृत्त्याआत्वनिवृत्त्याचशित्वस्यचरितार्थत्वात् एवंचउपसर्गात्सुनोतिसुवतिभवतेरः ध्यायतेः संप्रसारणंचेत्यादिनिर्देशादकर्तृवाचिन्यपिपरेशवाद्य इत्येवव्याख्येयम् अन्यथाङ्कृष्टिपावितिसूत्रेवक्ष्यमाण ग्रंथेनसहविरोधापत्तेः केचित्तुशित्वात्तिपः सार्वधातुकत्वेनभवतिरित्यादावार्द्धधातुकस्येड्वलादेरितिइडागमनिवृत्त्याब्रुवीतिरित्यत्रब्रुवईडितिईडागम

भवतेरः ७।४।७३।भवतेरभ्यासस्योकारस्यअः स्याल्लिटि॥अभ्यासेचर्च्च ८।४।५४अभ्यासेझलांचरः सुर्जशश्चशांजशः खयांतुच रः तत्रापिप्रकृतिजशांप्रकृतिजशः प्रकृतिचरांप्रकृतिचर इतिविवेकः आंतरतम्यात्॥असिद्धवदत्राभात् ६।४।२२।इतऊर्द्धमापादपरि समाप्तेरभीयम् समानाश्रयेतस्मिन्कर्त्तव्येतदसिद्धंस्यात् इतिबुकोऽसिद्धत्वादुवङि प्राप्तेबुग्व्यादावुवङ्यणोः सिद्धोवक्तव्यो॥ बभूवबभूवतुःबभूवुः॥आर्द्धधातुकस्येड्वलादेः ७।२।३५वलादेरार्द्धधातुकस्येडागमःस्यात् बभूविथबभूवथुः बभूव॥बभूव॥ बभूविव॥बभूविम॥अनद्यतनेलुट्॥३।३।१५भविष्यत्यनद्यतनेऽर्थेधातोर्लुट्स्यात् स्तासीलृलुटोः ३।१।३३।लृइति लृङ्लृटो ग्रहणंधातोःस्यतासीएतौप्रत्ययौस्तः लृलुटोःपरतः॥शवाद्ययवादः ॥ ९ प्रवृत्त्याच शित्वंचरितार्थमितिव्याचख्युःतन्निंद्यंतितुत्रेत्यनेनेण्निषे धादार्द्धधातुकत्वेपिक्ष्नस्यभावात्ब्रुवईडित्यत्रब्रुवः परस्यहलादेःपितईडागम इत्येतन्मात्रस्यमूलेव्याख्यातत्वात् सार्वधातुकस्येतिविशेषणा भावेपिक्ष्नस्य भावात् नचहलादेःपित्प्रत्ययस्यसार्वधातुकस्येतिविशेषणाभावेवुवोलिटिवच्यादेशेसिपः थलिउवक्थेत्यत्रातिप्रसंगः स्यादितिवाच्यम् थलोत्रपित्वाभावा त् नचस्यानिवृत्त्यावेनपित्वंशानचः शित्वेनलिंगेनक्वचिदनुबंधकार्येषनल्विधावितिनिषेधात्तस्मात् पूर्वोक्तरीत्यैवश्तिपः शित्वसामर्थ्यादकर्तर्यपिशपः प्रवृत्तिरितिग्रन्थोनिरकर्त्तव्यइत्याहुः तदपरेनक्षमंतेथलः पित्वाभावेह्यसंयोगाल्लिट्किदितिकित्वाद्वचिस्वपीतिसंप्रसारणेसत्युवचिथउवक्थेतिनसिद्धेत्किं

भाष्येप्रत्याख्यानमित्याशयेनतत्प्रवृत्तेः अतएवलादयतिमादयतीत्येवन्याय्यमितितत्रोक्तमितिदिक् आर्द्धधातुकस्येड्वलादेः नेड्वशि कृतीत्यतइडित्यनुवर्त्तमानेपुनरिट्ग्रहणंनिषेधसंबद्धस्येटोनिवृत्त्यर्थम् वस्तुतस्तुसमर्थानांप्रथमाद्वेत्यनुवृत्तस्यपरत्रयस्यमध्येप्राक्तृदिशइत्यनंतरंसमर्थानांप्रथमेतिनिवृत्तेवेतिचानुवर्त्ततइति ख्याख्यानमिवनेतिनिवृत्तम् इडित्यनुवर्त्ततइतिख्याख्यातुंशक्यत्वादिट्ग्रहणंत्यक्तुंशक्यं तथापिस्पष्टप्रतिपत्त्यर्थंतत्स्वीकृतमितिवोध्यम् आर्द्धधातुकस्येतिकिंआस्तेशेतेवलादेः किंएधनीयम् ननुरुदादिभ्यः सार्वधातुकइत्यनेनसार्वधातुकस्ययदिड्भवतितर्हिरुदादिभ्यएवेतिनियमादास्तेशेतेइत्यत्रनभवेदित्यार्द्धधातुकस्येतिव्यर्थम् नचरुधादिभ्यः सार्वधातुकएवेतिविपरीतनियमाद्रोदितेत्यत्रनस्यादास्तेशेतेइत्यत्रतुस्यादितिशंक्यम् रुद विदमु षग्रहिस्वपिप्रच्छः संश्नेतिक्ङितोः किंत्वस्यवैयर्थ्यप्रसंगात् त्वदुक्तरीत्यारुदादेः क्ङितोरिडागमाभावेननक्ङितीडितिनिषेधाप्रवृत्त्याक्ङित्प्रत्ययेऔपदेशिककित्त्वस्यसुस्थत्वात् हलंताच्चेतिकृलादिसनः किन्त्वाच्च तस्मादिपरीतनियमासंभवेनआर्द्धधातुकग्रहणंव्यर्थमेव ननुतद्ग्रहणाभावेवलादेरित्यस्यांगस्येतियदपिकृतं तद्विशेष्यंस्यात् ततश्चअडाटाविवड्डागमोपिअङ्गस्यस्यात्तदैवम् कृतेप्यार्द्धधातुकग्रहणेवलाद्यार्द्धधातुकस्यपदंगंतस्येडागमइतिव्याख्यानापत्त्याउक्तदोषतादवस्थ्यात् अकृतेपितद्ग्रहणे अंगस्ययोवलादिरंगंनिमित्तंतस्येडितिव्याख्यानादिष्टसिद्धेश्चतस्मादुभयथापिव्याख्यानेशरणीकर्त्तव्येआर्द्धधातुकस्येत्यस्यत्याग एवश्रेयान् नन्वेवं केशवः अङ्गनावृत्सत्वमित्यत्रेट्स्यात् ऋतइद्धातोरित्यतः धातोरित्यनुवर्त्तनादधातोः परस्यनभवतिइतिपरिहारसंभवेपिलूभ्यांपूभ्यामित्यत्रदुर्वारस्वेडागमः विहितविशेषणेनाप्यवारितुमशक्यः किंवंताः धातवोनजहतीतिपूभ्यांपूभिरित्यत्रभ्यामादेर्धातोर्विहितत्वानपायात् किंचजुगुप्सतेइत्यादौगुप्तिज्किद्भ्यइतिधातोर्विहितस्यसनः इट्दुर्वारःस्यात्नचेहधातोः परत्रविहितस्यवलादेरितिव्याख्यानलाभायधातोरितिपंचम्यंतमपेक्षितंतच्चदुर्लभं ऋतइद्धातोरितिषष्ठ्यंतत्वात् तथाचवृत्सत्वमित्यादावपिइडागमप्रसंगइतिवाच्यम् शब्दाधिकारपक्षेस्वरितत्वेनतत्सदृशशब्दोनुमीयतइतिपंचम्यंतलाभात् अस्तुवाषष्ठ्यंतत्वंविहितत्वंषष्ठ्यर्थइतिव्याख्यायामिष्टसिद्धेः तस्मात्जुगुप्सतइत्यादावतिप्रसंगवारणार्थंआर्द्धधातुकस्येतिग्रहणंकेचित्तुधातोरितिआवर्त्यधातोरित्युच्चार्य्यविहितो यः प्रत्ययः तस्येडिति यदिव्याख्यायेततदालूभ्यांजुगुप्सतइत्यत्रातिप्रसङ्गाभावादार्द्धधातुकस्येतिव्यर्थमित्याहुः वभूविवेतिनचात्रश्नुकः कितीतिइण्निषेधेवुगागमोपिन दितिशंक्यम् क्त्वा दिनियमादिटः प्रवृत्तेःअनद्यत्तने अतीतायारात्रेः पश्चार्द्धेनआगामिन्याः पूर्वार्द्धेनसहितोदिवसोद्यतनइतिकालोपसर्ज्जनेचतुल्यमित्यत्रस्थितं।

षयलाभार्थेआभाद्रहणंकिं आभीयंप्रत्येवाभीयमसिद्धंनान्यंप्रतीतियथास्यादित्येवमर्थंतेनअभाजिरागदित्यत्रभंजेश्चविणिरंजेश्चघञिचभावकरणयोरितिनलोपेकृ
तेतस्यासिद्धत्वाभावादतउपधायाइति वृद्धिर्भवतीत्याहुः स्यादेतत् देभतुःदेभुरित्यत्रश्रथिग्रंथिदंभीतिवक्ष्यमाणवचनेनलिटः कित्वान्नलोपेप्येत्वाभ्यासलोपौनस्याना
म् नलोपस्यासिद्धत्वात् अत्राहुः श्नसोरल्लोपइतितपरकरणाल्लिंगादाभीयासिद्धत्वमनित्यमितिनास्त्यत्रदोषः तपरकरणंहिआस्तामित्यत्रआडागमस्यलोपोमाभू
दित्येतदर्थम् यद्याडागमः श्नसोरल्लोपंप्रत्याभीयत्वेनासिद्धः स्यात्तर्हिकिंतेनतपरकरणेन एवंचदंभेश्चेति वक्ष्यमाणंनापूर्ववार्तिकंकिंत्वनित्यत्ववललभ्यमे
वेतिभुवोवुक् शास्त्रस्य एवमग्रेपियुट्उदाहरणम्तुदिदीपेवभूवेति अत्रप्राचांढ्यधिभवतिर्भ्यांचेतिसूत्रेणितोपिलिटः किंत्वार्थमितिव्याख्यायाचोक्तिनीतिवृद्धि
प्राप्तौकुतिचेतिनिषेधइत्युक्तम् तदुपेक्षितंदंग्लक्षणयोरेवगुणवृद्धोर्निषेधइतिसिद्धांतात् अन्यथाद्वक्स्थानिकयोर्निषेधेलैगवायनइत्यात्रापिवृद्धिर्नस्यात्
नचात्रकिंत्वसामर्थ्यादनिगलक्षणायाअपि वृद्धेर्निषेधइतिवाच्यम् थलिउत्तमेणलिचगुणनिषेधेनकित्वस्यचरितार्थत्वात् सूत्रंतुप्रत्याख्यातमेवाकरे तथाच
वार्तिकम् इंधेश्छंदोविषयत्वात्भुवोवुकोनित्यत्वात्ताभ्यांलिटः किद्वचनानर्थक्यमितियद्यपीहशब्दांतरप्राप्त्यावुकोनित्यत्वंनास्ति तथापिकृताकृतप्रसंगित्वमा
त्रेणापिक्वचिन्नित्यतास्वीक्रियतइतिपक्षोप्यस्मादेववार्त्तिकादवगम्यतेतेनरधेर्णिचिपरामपिउपधावृद्धिंबाधित्वानित्यत्वात् रधिजभोरचीतिनुमिकृतेरंधयती
तिसिद्धं नन्वेवमपिसंयोगात्परस्यलिटः किंत्वार्थइंधेश्चेत्संशोपेक्षितएव अन्यथासमीधेदस्युहंत ममित्यत्रइंधेर्नलोपोनस्यात् मैवम् कृंदस्युभयथेतिसूत्रेणहि
सार्वधातुकसंज्ञाआर्द्धधातुकसंज्ञाचविधीयते तेनसार्वधातुकमपिदितिलिटोडिःत्वेस्यादेवनलोपइतिवार्त्तिकाशयात् अत्रनव्याःबभूवेत्यत्रद्विर्वचनेचीत्यजादे
शस्यनिषेधादुण वृद्धिभ्यांप्रागेववुकः प्रवृत्त्याभुवोवुकोनित्यत्वादितिवार्तिकेनित्यत्वादितिहेतूपन्यासोनिष्प्रयोजनःशब्दांतरप्राप्त्यावुकोनित्यत्वंनास्तीत्याशंक्यकृ
ताकृतप्रसंगित्वमात्रेणापिक्वचिन्नित्यत्वंस्वीक्रियतइत्यादिसमाधानमपिव्यर्थमेवेत्याक्षिप्यस्वयमेवसमादधुः षाष्ठद्वित्वप्रकरणंतेहिवार्त्तिककृतापूर्वविप्रतिषेधः
पठ्यते द्विर्वचनेयणयत्रायावादेशाल्लोपोपधालोपाणिलोपकिकिनोरुलेभ्य इतितथाचद्विर्वचनेचीतिसूत्रेणारभणीयमित्याशयेननित्यत्वादितिहेतुरुपन्यस्तइति द्वि
र्वचनेचीतिसूत्रेणअजादेशस्यस्थानिवद्भावो विधीयतइतिपक्षेतुद्वित्वात्प्रागेववृद्ध्याद्यादेशस्यस्वीकृतत्वादादेशानंतरमपिवुकः प्रवृत्तिरस्तीतिभुवोवुकोनित्यत्वादि
त्यादिग्रंथःसम्यगेवनचैवमपि नामधातुश्लाघयतिमापयतिइत्यत्रमपर्य्यंतस्यलौपरूपात् पूर्वंनित्यत्वाद्गिलोप इतिग्रंथःकथंसंगच्छेतेतिवाच्यम् प्रकृत्यैकाजितिसूत्र

रितुमुनःप्राप्तिरस्ति भावेहिसःसमानकर्तृकेष्वेवेतिचवक्ष्यतेलडित्येतावत्सूत्रकरणेपिभविष्यतीतिव्रजतीत्ययंसिद्ध्येवेत्यास्तांतावत् लोट्च विधिनिमंत्र णेत्याद्यनुवर्त्ततेतदाहविध्यादिषिति॥ ॐ ॥आशिषिलिङ्·लोटौ॥ननुविध्यादिसूत्रएवसंप्रश्नप्रार्थनाशीःषिसुच्यतांकिमनेनपृथक्सूत्रकरणेनेतिचेदत्रा ङ्ः इहहिक्तिच्क्तौचेत्युत्तरसूत्रार्थमाशिषीतितावदावश्यकं लिङ्·लोटावपिइहैवविधेयौविध्यादिसूत्रेआशीर्ग्रहणेहिस्मेलोडित्यादिनास्वविषयेपर.

आशिषिलिङ्·लोटौ।३।३।१७३।एरुः३।४।८६लोटइकारस्यउः स्यात् भवतु तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्७।१।३५॥आशि षितुह्योस्तातङ्ङःस्यात् अनेकाल्त्वात्सर्वादेशःयद्यपिडि·च्वेत्ययमपवादस्तथाप्यनन्यार्थडि·त्त्वेघनङादिषुचरितार्थ इति गुणवृद्धिप्रतिषेधसंप्रसारणाद्यर्थतयासंभवत्प्रयोजनङ्·कारेतातडि·मंथरंप्रवृत्तःपरेणबाध्यतेइहोत्सर्गापवादयोरपि समबलत्वात् भवतात् लोटोलङ्वत् ३।४।८५लोटोलङ्·इवकार्यंस्यात् तेनतामादयः सलोपश्चतथाहि तस्यस्थमिपांतांतंता मः।३।४।१०१डि·त्सञ्चतुर्णान्तामादयःक्रमात्स्युः नित्यंडि·तः३।४।९९सकारान्तस्यडि·दुत्तमस्यनित्यंलोपःस्यात् अलोंत्यस्येतिस लोपः भवतां भवन्तुसर्ह्यः पिच्च ३।४।८७लोटःसेर्हिःसोःपिच्च अतोहेः९।४।१०५अतःपरस्यहेर्लुक्स्यात् भव भवतात् भवतं भवत मेर्निः३।४।८९लोटोमेर्निःस्यात् आडुत्तमस्यपिच्च ३।४।९२लोडुत्तमस्याडागमःस्यात्सपिच्चहिन्योरुत्वन इकारोच्चार णसामर्थ्यात् भवानि भवाव भवाम अनद्यतनेलङ्·३।२।१११अनद्यतनभूतार्थवृत्तेर्धातोर्लङ्·स्यात्॥लङ्·लुङ्·लृङ्· ष्वडुदात्तः९।४।७१एषुपरेष्वङ्ग·स्यअडागमःस्यात्सचोदात्तः॥ << ह्यधःस्यात् सिद्धांतेतुपरत्वादेषविधिःस्मेलोडित्यादेःबाधकइति महान्विशेषइति तुह्योस्तातङ्·यद्यपितिह्योस्तातडि·तिवक्तुंशक्यतथापिलाघवाभावादतिप्रसंगवारणायहिशब्दसाहचर्याश्रयणेलोटइत्यनुवर्त्त नेवागौरवाच्चतुह्योरित्युक्तं लोटोलङ्·वत् लोटइत्युपमेयेषष्ठीदर्शनात्उपमानादिषक्ष्यतादेववतिस्तदाह तेनेति अडागमस्तुनातिदिश्यते नहितौलङः क्रियेः

आर्द्धधातुकंधातोरि—तिधातोरेकाचइत्यतः धातोरित्यनुवर्त्तमानेपुनर्द्धातोरित्यधिकारसूत्रारभादिदंलभ्यतेएतच्चतत्रैवमनोरमायांस्पष्टम् धातोरितिविहिते तिकिम् लूभ्यांजुगुप्सते अनेकव्यवहितस्येति सार्वधातुकादिकमिकोविशेषणंनत्वंगस्येतिभावः तासस्योःसस्यार्द्धधातुकइत्यतःसीत्यनुवर्त्तते अंगाच्चिप्रत्यय यस्यसीत्यनेनविशेषणात् यस्मिन्विधिरितितदादिविधिस्तदिदमाह सादाविति एवंरादावित्यत्राप्यूह्यम् प्राग्वदिति तासेर्लोपइत्यर्थः अस्तिस्त्वनेहसंबध्यतेततोरा

आर्द्धधातुकंशेषः३।४।११०॥तिङ्शिङ्ोन्योधातोरितिविहितःप्रत्ययएतत्संज्ञःस्यात्ङिट् लुटःप्रथमस्यडारौरसः २।४।८५ डारौर सएतेक्रमात्स्युःडित्त्वसामर्थ्यादभस्यापिटेर्लोपः पुगंतलघूपधस्यच७।३।८६ पुगंतस्यलघूपधस्यचांगस्येकोगुणः स्यात्सार्वधातु कार्द्धधातुकयोःपरतःयेननाव्यवधानंतेनव्यवहितेपिवचनप्रामाण्यात्तेनभिनत्तीत्यादावनेकव्यवहितस्येकोनगुणः भवित् आअत्रेकोगुणेप्राप्ते दीधीवेवीटां १।१।६ दीधीवेव्योरिटश्चगुणवृद्धीनस्तःभविता तासस्योर्लोपः७।४।५० तासेरस्तेश्चलोपःस्यात्सा दौप्रत्ययेपरेरिच।७।४।५१ सादौप्रत्ययेप्राग्वत् भवितारौभवितारः भवितासि भवितास्थःभवितास्मिभवितास्वः भवितास्मःलृटशे षेच३।३।१३ भविष्यदर्थाद्धातोर्लृट्स्यात् क्रियार्थायां क्रियायामसत्यांसत्यांचस्यःलृटभविष्यति भविष्यतः भविष्यंति भविष्य सि भविष्यथः भविष्यथ भविष्यामि भविष्यावः भविष्यामः लोङ्ब ३।३।१६२ विध्यादिषर्थे षुधातोर्लोट्स्यात्॥

दिप्रत्ययस्यासंभवात् लृटशेषेचतुमुन्ण्वुलौक्रियायांक्रियार्थायामिति प्रागुक्तम् ततोन्यः शेषइत्याह असत्यामितिँहरदत्तस्त्वाह॥अस्वरितत्वादेवक्रियार्था यांक्रियायामितिनानुवर्त्तते एवंचशेषेचेतिसुत्र्यजमिति तच्चिंत्यं शयिष्यत इतिस्यीयतेइत्यादौतुमुनालृटोबाधापत्तेःक्त्वस्तुमुन्खलर्थेषुवासरूपविधे रभावात् अत्रचज्ञापकम् प्रेषातिसर्गप्राप्तकालेषुकृत्याश्चेत्यत्रलोटाबाधामाभूदितिपुनःकृत्यविधिरित्यादिरुदंतेवक्ष्यतिइदमपिज्ञापकमित्यन्यदेतत् यत्तु प्रा चांभविष्यतीतिव्रजतीत्युदाहृत्य तदापत्तितः तुमुन्विषयेपिलृटभवति तुमुनालृसनवाध्यतेइत्येवत् प्रतिपादनायत्तस्यानुपयोगात् नहिभविष्यतीत्यत्रकर्त्तृ

चार्थमाह सत्यामिति ४

विधिनिमंत्रणाद्योत्येषुवाच्येषुवेति पक्षद्वयस्यापिआकरेस्थितत्वादितिभावः अत्रआद्येलित्यनुपपत्तिः विध्यादीनांप्रत्ययार्थत्वमनुचितं तथाहिसतिकर्त्रादीनामर्थानांलकारांतरेचरितार्थानांविध्यादयोर्थाःबाधकाःस्युः तथाचलिङःकर्त्रादयभिधायकत्वंनस्यात् ततश्चद्विवचनबहुवचनेनस्याताम् शबादयश्चनस्युःपुरुषत्वंस्याचनस्यात् अभिहितत्वप्रयुक्तस्तृतीयादिर्विरहश्चनसिध्येदिति द्वितीयेलित्यनुपपत्तिः विध्यादिभिः कर्त्रादयोनवाच्यंतेपरस्परविरोधाभावात् तथाचलः कर्मणीत्यत्रलइतिवहुवचननिर्देशेनसर्वलकाराणांसंग्रहात् लिङादीनामपिकर्त्रादयोर्थाभवेयुः किंचकर्त्रादयोपिनिरवकाशाःनचलडादयोवकाशाःन्यायसाम्येनविध्यादिवद्वर्त्तमानत्वभूतत्वादेरपितत्तल्लकारवाच्यत्वात् नचैवम् पचतीत्यादौधात्वर्थंप्रतिवर्त्तमानत्वादेःप्रत्ययार्थतया

विधिनिमंत्रणामंत्रणाऽधीष्टसंप्रश्नप्रार्थनेषुलिङ्॥३।३।१६१॥एष्वर्थेषुद्यो—त्येषुवाच्येषुवाधातोर्लिङ्स्यात्विधिःप्रेरणंभृत्यादेर्निकृष्टस्यप्रवर्त्तनंनिमंत्रणंनियोगकरणं आवश्यकेश्राद्धभोजनादौदोहित्रादेःप्रवर्त्तनम्॥आमंत्रणं कामचारानुज्ञाअधीष्टःसत्कारपूर्वकोव्यापारः॥प्रवर्त्तनायांलिङ्चतुर्ष्वर्थेष्वनुपादानंप्रपंचार्थं॥यासुट्परस्मैपदेषूदात्तोडिच्च॥३।४।१०३॥लिङःपरस्मैपदानांयासुडागमःस्यात्सचोदात्तोडिच्चडिच्चोक्तोर्ज्ञायत्तेकचिदनुबंधकार्य्येप्यनल्विधाविति प्रतिषेधइतिश्नादेशस्यशानचश्चित्वमपीहलिंगं॥ << विशेष्यत्वंस्यात् तथाचैककर्त्रेकावर्त्तमानापचिक्रियेत्यादिशाब्दबोधवर्णनमयुक्तंस्यादितिवाच्यम् प्रत्ययार्थे तयाविशेष्यत्वापादनस्यकर्त्रादावपितुल्यत्वात् ननुप्रत्ययार्थःप्रधानंप्रकृत्यर्थोविशेषणमित्यौत्सर्गिकमाख्यातेत्यज्यतेभावप्रधानमाख्यातमितिसिद्धांतानुरोधादितिचेत् तर्हितत एवनोक्तदोषइतिदिक् प्रवर्त्तनायामिति प्रवर्त्तनात्वस्यविध्यादिषुचतुर्षुअनुस्यूतत्वादितिभावः अत्रवदंतिप्रवृत्तिः प्रवर्त्तनाचोभयमपिव्यापारः सचधात्वर्थः। फलव्यापारयोर्द्वयोर्वाच्यत्वस्वीकारात्तदाश्रयस्तुलकारार्थः व्यापारत्वेनप्रवर्त्तमानायाधात्वर्थत्वेपिप्रवर्त्तनात्वेनप्रवर्त्तनानुलिङ्त्वादिरूपेणलकारवाच्यत्वाच्चेतिपक्षद्वयं प्रवृत्तिः पुरुषनिष्ठाआर्थीभावनेत्युच्यते प्रवर्त्तनानुविधिः मांप्रेरयतीत्यनुभवाल्लिङादिनिष्ठाशाब्दीभावनेत्युच्यते वेदएवलि

अंगस्येतिभावः नन्वेवमपियांतुवांतुइत्यत्रलङः शाकटायनस्येतिजुस्स्यात् जुहूतुविंदलित्यत्रतुसिजभ्यस्तेतिजुस्स्यात् अत्राहुः विदोलटोवेतिवाग्रह
णमिहानुवर्त्यव्यवस्थितविभाषाश्रयणान्नजुस् यद्वालङः शाकटायनस्येतिसूत्रेनित्यंडि॰तद्स्यतोडि॰तद्स्यनुवृत्त्यैवेष्टसिद्धेः लङ्ग्रहणमतिरिच्यते लुङि॰सि
चालङि॰स्यप्रत्ययेनचव्यवधानात् लिङि॰तुमर्जुसितिजुसोविहितत्वाच्चङि॰तद्स्यस्यलङ्ग्येवपर्यवसानात् ततोलङ्ग्रहणंविभज्यते नियमश्चायंलङेवयोल
ङ॰तस्यैवमर्जुस् नतुलङ्॰वद्वावेनयोलङ्॰तस्येत्यतोनोक्तदोषइति तन्निंयम अदुरित्यत्रसिजभ्यस्तेतिनित्यजुसंबाधित्वापरत्वाच्छाकटायनस्येतिविकल्पप्रसंगा
ते तस्माल्लङ्ग्रहणंशाकटायनसूत्रेकतैत्यमेवनतुतदतिरिच्यते नचभातइतिसूत्रेणअदुरित्यत्रनित्यंजुस्स्यादितिवाच्यम् तस्यनियमार्थत्वेनविध्यर्थत्वायो
गात् अन्यथाभूवन्नित्यत्रसिजभ्यस्तेतिजुस् दुर्वारएवस्यादितिनम्राः यदिहिभातइतिसूत्रमावर्त्यविध्यर्थतांनियमार्थतांचव्याख्यायेत तदातूक्त
दोषाभावात् यद्वेतिसमाधानमपिसम्यगेवशाकटायनस्येति जुसोवैकल्पिकत्वात् तदभावपक्षेपुनः प्रसंगविज्ञानात् सिजभ्यस्तेति जुसिस्वीकृतेतुसुत

इतश्च॥३।४।१००॥डि॰तोलस्यपरस्मैपदमिकारान्तंयत्तस्यलोपः स्यात्॥ अभवत्। अभवतां। अभवन्। अभवः। अभवतं। अ
भवत। अभवं। अभवाव। अभवाम ॥ ९ रांसम्यगेवपरंतुजुहूतुविंदलित्यत्रजुस्वारणायव्यवस्थितविभाषातुआश्रयणीयैवेतिदिक् सका

रांतस्येति डि॰ल्लकारोत्तमसकारस्येतिप्राचो व्याख्यानेत्वयुक्तम् भूयासमित्यादावतिप्रसंगः स्यादितिभावः डि॰दुत्तमस्येति डि॰ल्लकारोत्तमस्येत्यर्थः
तेनभवावः भवामइत्यादेनातिप्रसंगः सोपिचेत्तिएवंचपित्वेनानुदात्तसपिपः स्थानेयोहिरादेशः सतुस्थानेंतरतमइत्यनुदात्तोनभवतिजहिशत्रूनसुहि
श्रुतं भवतादिति लुगपेक्षयापरत्वाद्धेस्तातङ॰अंतरंगानेवलुक्बाधतेनतुपरमितिभावः सपित्वेति सइतितच्छब्देनयस्याज्ञागमः सपरामृश्यतइत्याहुः॥
इतश्च इतश्चलोपइतिसूत्रात्परस्मैपदेषित्यनुवृत्तेषष्ठ्येकवचनांततयाविपरिणम्य इतइत्यनेनविशेष्यतेतदाह परस्मैपदमिकारांतयत्तस्येति
प्राचातुपरस्मैपदेषिकारस्यलोपइत्युक्तं तदयुक्तं भवेदित्यादावतिव्याप्तेः नन्वतोमेपइत्यत्रईयदीर्घादिरस्तु एवंचनोक्तातिव्याप्तिरितश्चेतितपरकर
णादतएवअवोभवीदित्यादावपिनदोषइतिचेन्नैवं रुदेर्लङि॰अरुदितामित्यत्रदोदोषधौव्यादितिमनोरमायांस्थितं ॥ ※ ॥

स्यति सकारद्वयस्यापीति अवयवावयवोपिसमुदायंप्रत्यवयवद्वयाश्रयणात्सुट्योपिलिङ्भक्तत्वादितिभावः आशीर्लिङ्गेति भूयास्तामित्यादौ ननुसुटिकृतेअ नचिचेतिद्वित्वस्यासिद्धत्वात्तत्तः प्रागेवस्कोरितियासुटःसकारोलुप्यतेनलिपरेयः संयोगस्यादित्वात्तत्रयावेकसकारकरूपतुल्यसुड्भावेयासुटःसकारस्यद्वित्वे कृतेनसुटिस्कोरितिसलोपात्सुटएवसकारस्यद्वित्वेचद्विसकारकमपिरूपतुल्यमेवेतिसुटोविधानंव्यर्थमित्यपरितोषादाहस्फुटतरंत्विति एधिषीष्टेत्यादावि भावः॥ ॥ मध्येपवादन्यायेनेति रुदादिभ्यइतिसूत्रात्सार्वधातुकइत्यनवृत्तावन्यायप्रवृत्तेरितिभावः अंतरंगत्वादिति प्रत्ययमात्रापेक्षत्वात् अतोयेयइत्यस्यत्वाङ्गत्वात्सकृतिप्रत्ययोभयसापेक्षत्वेनबहिरंगत्वादितिभावः नन्वपदांताकारस्यजसश्चाश्रयणात्परूपस्याप्युभयसापेक्षत्वमस्त्येवेतिचेन्मैवं वर्णाश्र

अतोयेयः॥७।२।८०।अतःपरस्यसार्वधातुकावयवस्याइत्यस्येयस्यात्॥गुणःयलोपःभवेत्॥सार्वधातुकेतिकिंचिकीर्ष्यात्मध्येपवा दन्यायेनातोलोपएववाध्येतभवेदित्यादौतुपरत्वाद्दीर्घःस्यात् भवेताम्॥झेर्जुस्॥३।४।१०८।लिङोझेर्जुस्स्यात् जइत्॥उस्यपदान्तात्॥ ६।१।९६॥अपदान्तादवर्णादुसिपरेपररूपमेकादेशःस्यात् इतिप्राप्तेपरत्वान्नित्यत्वाच्चातोयेयइतिप्राज्ञः यद्यप्यन्तरंगत्वात्परूपं न्याय्यंतथापियासइत्येतस्यइयइतिव्याख्येयंएवंचसलोपस्यापवादइय् अतोयेयइत्यत्रतुसंधिरार्षः भवेयुःभवेः भवेतंभवेत भवेयं भवेव भवेम लिङाशिषि॥३।४।११६।आशिषिलिङःस्तिङोर्द्धातुकसंज्ञःस्यात् किदाशिषि।३।४।१०४।आशिषिलिङोयासुट्कित्स्या त्सकोरितिसलोपः॥ ९ यणेपिप्रत्ययमात्राश्रयतयाप्रकृतेरनाश्रयणात्व्याख्येयमिति एतच्चविप्रतिषेधसूत्रेभाष्येस्पष्टं आर्द्धातुकसंज्ञेति लडःशाक टायनस्यैवेत्यतएवकारोनुवर्त्तनीयः अन्यथाएकसंज्ञाधिकारवहिर्भूतत्वेनसार्वधातुकसंज्ञापिस्यात्तत्रापक्षेशवादिःस्यात् किदाशिषिङित्त्वेनैवगुणवृद्धिप्र तिषेधेसिद्धेकिङ्चनद्रुज्यादित्यादौसंप्रसारणार्थंजागर्यादिसत्रेगुणार्थंच जागर्त्तेर्गुणोहिङितिपर्युदस्यतेङित्त्वेहविशेषविहितेनकित्त्वेनबाध्यते सलोपइ ति झलपरसंयोगादित्वेनयासुटःसस्यलोपःसुटस्तु पदान्तसंयोगादित्वेनेतिभावइतिमनोरमायांस्थितं तदसंवद्धमितिमत्वाअत्रनिष्कर्षमाहुः भूयास्तांभूया स्तं भूयास्तेत्यत्रझलपरसंयोगादित्वेनयासुटःसस्यलोपः भूयादित्यत्रसुट इवयासुटोपिसस्यलोपः पदांतसंयोगादित्वेनैव अन्यथाझलपरसंयोगादिलोपस्या

सिद्धत्वात्तस्यासंयोगांतत्वेनपदत्वाभावात्सुट्योपिसस्यलोपः

ङादिनिष्ठावत्कुरभावाल्लोकेतुपुरुषादिनिष्ठेतिकेचिद्भ्युपगच्छंतिप्रवर्तनायाअस्याःपुरुषप्रवृत्तिरेवभाव्यापुरुषप्रवृत्तेस्तुयजनदानादिभाव्यम् एवंचधातूपात्त
व्यापारस्यविषयविषयिभावेनद्वैधान्वयेतात्पर्य्यग्राहकालिङादयइतिद्योतकतापक्षएवज्यायान् लिङ्-लादिरूपेणलकारस्यप्रवर्त्तनायांशक्त्यंतरकल्पनेगौ
रवादेवंणिच्यपि इयांस्तुविशेषः णिच्प्रत्ययद्योत्याप्रेरणासर्वस्मिन्नपिमतेपुरुषादिनिष्ठेवनतुणिज्निष्ठालिङादिद्योत्यातुमतभेदेनलिङ्-निष्ठावापुरुषनिष्ठा
वेतिस्यादेतत् लिङादिद्योत्याप्रवर्त्तनालोकेपुरुषनिष्ठेतिमतेपाचयत्योदनंदेवदत्तेनयज्ञदत्तइतिवत्पचेदोदनंदेवदत्तेनयज्ञदत्तइतिप्रयोगःस्यात् प्रवृत्त्याश्र
यःप्रवर्तनाश्रयश्चलकारेणोक्तइतिकर्त्तरितृतीयानभवतिकिंतुप्रथमैवेतिचेत्तर्हिओदनंदेवदत्तोयज्ञदत्तः पचेदितिप्रयोगःस्यात्अत्राहुः पुरुषनिष्ठेतिमतेप्र
वर्त्तनालिङादिवाच्यैवनतुधातुवाच्या नथाचलिङ्-पात्तव्यापाराश्रयस्यपुरुषस्यकर्त्तृत्वाभावान्नोक्तदोषः देवदत्तेनपाचयतियज्ञदत्तइत्यादौतुणिजंतस्यधातुत्वा

सुट्तिथोः॥३।४।१०७॥लिङ्-स्तकारथकारयोः सुट्स्यात्। सुटायासुप्ननवाध्यतेलिङ्गेयासुट्तकारथकारयोःसुडितिविषयभेदात्॥
लिङ्ः सलोपोनंत्यस्य॥७।२।७९॥सार्वधातुकलिङोनंत्यस्यसस्यलोपःस्यात् इतिसकारद्वयस्यापिनिवृत्तिःसुटश्चवर्णत्वाश्रीर्लिङिस्फु
टतरंतुतत्राप्यात्मनेपदे॥ ९९ द्धातूपात्तव्यापाराश्रयत्वेनप्रयोज्यप्रयोजकयोरुभयोरपिकर्त्तृत्वाल्ल कारेणाऽनुक्तेप्रयोज्येकर्त्तरितृतीयेतिवैषम्यमिति कौ
स्तुभादौतुहेतुमतिचेतिसूत्रेप्रयोजकव्यापारस्यणिजर्थत्वेनमुख्यत्वेनस्थापितः व्यापारद्वयस्यापिणिच्प्रकृत्यर्थत्वेतुअभीत्यस्यणिजर्थविशेषकत्वेअभि
सावयति प्रकृत्यर्थविशेषकत्वेतुउपसर्गात्सुनोतीतिषत्वमभिषावयतीतिसिद्धांतस्यस्वारस्यभंगापत्तेरितितथागतिबुद्धीतिसूत्रेअणिकर्त्तृतिविशेषण
मव्यावर्त्तकंस्यात् त्वन्मतेप्रयोजकव्यापारस्यापिणिच्प्रकृत्यर्थत्वेनप्रयोजकस्याप्यणौकर्तृत्वादितिदिक् प्रार्थनायाञ्चा क्वचिदितिज्ञापनफलंतुवक्ष्यमाणे
त्यादौरिदुगिल्लक्षणङीवभावइतिदिङ्नेतिसूत्रेएवोक्तं रूप्यादित्यादौउतोवृद्धिर्लुकिहलीतिनप्रवर्तते भाष्येपिच्चङि-न्नङि-च्चपिन्नेतिव्याख्यानाद्वि
शेषविहितेनङित्त्वेनपित्त्वस्यवाधादित्यदोषस्यमाणतयायासुटोङि-त्वंनज्ञापकमित्यपरितोषादाहश्चः शानचःशित्वमिति॥ ॥सुट्तिथोःत
कारादिकारउच्चारणार्थः लिङःसलोपोरुदादिभ्यइतिसूत्रात्सार्वधातुकइत्यनुवर्त्तते सेनि लुप्तषष्ठीकमनंत्यस्येत्यनेनविशेष्यतेतदाहसार्वधातुकलिङोनंत्य

प्रकृतेः परत्वाभावाच्चोक्तदोषशंकैवनास्तीति सर्वलकारापवादइति मास्त्विस्यादेर्निषेधार्थकमाशब्दोन्यएवनतुमाङि॰त्याहुः ङिलुङि॰इकारउच्चारणार्थइनिम
नोरमा नचमंत्रेघसेतिसूत्रेलेरितिस्थानेलङ्युच्यमानेङ्विभिन्नस्यापिलकारस्यलुक्स्यादितिशंक्यं गातिस्थेतिसूत्रात्सिचइत्यनुवर्त्यसिच्स्थानिनःस्थान्यर्हस्य
लस्यलुगितिव्याख्यायामतिप्रसंगाभावाद्विभाषानुवृत्तेर्लुकोवैकल्पिकतयाऊदसिरूपांतरस्यानापाद्यतयाचसिजनुवृत्तिंविनापिनातिप्रसंगइत्याहुः शवाद्यप
वादइति आदिशब्दात्तत्तद्गुणप्रयुक्तानाश्यन्नादीनांग्रहणंदृचाविताविति तत्रइदित्वेप्रयोजनममंस्तेत्यत्रानिदितामित्युपधालोपाभावः गातिस्था इहव्यवहि
तोपिलुगनुवर्त्ततेनतुश्नुः व्याख्यानादित्याशयेनाह॥लुगिति गापाविति गातीतिस्तिपाविकरणश्नून्यस्यनिर्देशाल्लुग्विकरणइणादेशोगृह्यतेलुग्विकरणालुग्विकर
णयोरलुग्विकरणस्यग्रहणमितिपरिभाषयापिवतिर्गृह्यतेनतुपातिरित्यर्थः॥ ॥भूसुवोः॰पूङ्॰प्राणिगर्भविमोचने सुवतिसूयत्योस्तुनग्रहणंतिङोविकरणेनव्य

भूसुवोस्तिङि॰॥७।३।८८॥भूसू एतयोस्सार्वधातुकेतिङि॰परेगुणोनस्यात्॥अस्तिसिचोऽपृक्ते॥७।३।९६॥सिच् अस्चेतिसमाहारद्व
न्द्वः सिच्छब्दस्यसौत्रंभत्वं अस्तीत्यव्ययेनकर्मधारयः ततः पंचम्याःसौत्रोलुक्विद्यमानात्सिचोस्तेश्चपरस्यापृक्तस्यहलईडागमः
स्यात् इति ईएनेहसिचोलुप्तत्वात् अभूत्॥हलःकिं॥ऐधिषि॥अपृक्तस्यकिंऐधिष्ट अभूता॥सिजभ्यस्तविदिभ्यश्च॥३।४।१०८॥सिचोभ्य
स्ताद्विदेश्चपरस्यडि॰त्संवध्विनोर्मेर्जेस्स्यात् इतिप्राप्ते ॥ ॥ वधानात् अस्तिसिचोपृक्ते अत्रब्रूमः अस्तिश्चसिच्चेतिसमाहारद्वंद्वेअस्तिसिच्तस्मादि
तिविग्रहंमत्वाअस्तेःसिचश्चपरस्येतिव्याचख्युस्तच्चिंत्यं तत्रसमासांतस्यानित्यत्वाश्रयेणद्वंद्वाच्चुदषहांतादिति प्राप्तस्यटचः परिहारेपिसमुद्राभ्राद्वइति
निर्देशादत्यात्तरमित्येतदनित्यमित्याश्रित्यसिच्छब्दस्यपरत्वसमर्थनेपिअस्तेर्भूरितिभूभावस्यस्थानिवत्त्वमाश्रित्यतत्राऽपृक्तस्यहलईडागमस्यदुर्वा रामः
रत्वात् तथागातिस्थाघुपाभूभ्यः सिचो लुक्यपिस्थानिवद्भावे नसिचः परत्वानपायादगादस्यादभूदित्यादौअति प्रसंगाच्चतदेतद्भूनयन्व्याचष्टेसिच्चा १३
स्चेति सौत्रंभत्वमिति तेनात्रकृत्वजश्त्वेनभवतइतिभावः विद्यमानादितिसिचोस्तेश्चविद्यमानविशेषणेनलुप्तात्सिचःकृतभूभावादस्तेश्चनेतिभावः

काशस्यानल्परसंयोगादिलोपस्यसंयोगांतलोपाबाधकत्वादिति॥ङिन्निमित्तइति॥किंतिगितिङितिपरेङ्कोगुणवृद्धीनस्तइतिनव्याख्यातं क्ङिन्नंभिन्नमित्यत्रलघूपधगुणस्यानिषेधप्रसंगात् नचारंभसामर्थ्यंशंक्यं चित्तंस्तुतमित्यादावव्यवहितेकितिचरितार्थत्वादितिभावः अन्येतुक्ङितीतिप्रत्ययग्रहणात् प्रत्ययेनसन्निधापितस्यांगस्यङ्गितिपरइति व्याख्यानेतुक्ङिन्नंभिन्नमित्यादिसिध्यत्येवनचैवंभवावः भवामइत्यादावतिप्रसंगइतिवाच्यं अंतरंगगुणंप्रतिबहिरंगनिषेधस्याप्रवृत्तेरित्याहुः॥क्ङितिचैतिसूत्रेचर्त्वेनगकारोपिप्रश्लिष्यतइत्याशयेनगिक्ङितङिन्निमित्तइत्युक्तंगितिकिंग्लाजिस्थश्रुग्लुःजिसुःकितित्वस्मिन्स्थास्नुरित्यत्रघुमास्थेतीत्वंप्रसज्येत नच स्नोर्गित्वेभूस्नुरित्यत्रदण् निषेधोनस्यात् ग्लाजिस्थश्चेतिचकाणदुवश्रुग्लुर्भवतीतिस्वीकाणदितिवाच्यंश्नुकः कितीत्यत्रापिचर्त्वेनगकारं प्र

क्ङितिच॥१।१।५।गित्कित्ङिन्निमित्तेङ्गलक्षणेगुणवृद्धीनस्तः भूयात् भूयास्तां भूयासुः भूयाः भूयास्तं भूयास्त भूयासं भूयास्व भूयास्म लुङ्।३।२।११०।भूतार्थक्रियावृत्तेर्धातोर्लुङ्-स्यात्माङि-लुङ्-३।३।१७५।सर्वलकारापवादः स्योत्तरेलङ्-च।३।३।१७६।स्योत्तरेमाङि-लङ्-स्याल्लुङ्॥श्लिलुङि॥३।१।४३।शवाद्यपवादः च्लेः सिच्॥३।१।४४॥दृचावित्तौ।गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु।२।४।७७॥एभ्यः सिचो लु।
क्यात् गापाविहेणादेशपिबतीगह्येते॥ ९ श्लिष्यगिक्ङितोरिण्नस्यादितिव्याख्यानात् नचैवंचर्त्वस्यासिद्धतयाश्नुकइत्यत्रविसर्जनीयोनलभ्यतइतिवाच्यं चेत्युत्तमेवस्यादितिवाच्यंसौत्रत्वान्नमनइत्यत्रनेतियोगविभागेनासिद्धत्वाभावाद्वाइष्टसिद्धेः वामनस्तुग्लाजिस्थइतिसूत्रेस्थाआङितिप्रश्लेषात्स्थास्नुरित्यत्रघुमास्थेतीत्वंनभविष्यतीतिगकारप्रश्लेषाभावात् नश्नुकः कितीत्यत्रचर्त्वस्यासिद्धत्वाभावसमर्थनक्लेशइत्याहुरग्लक्षणेइति इगइत्येवविहितेइत्यर्थः इग्लक्षणेकिं लैगवायनः लिगोर्नडादित्वात्फक्इहादिवृद्धेरेगुणस्यचवस्तुगत्याइक्स्थानिकत्वेपिननिषेधः नचैकइत्युक्तेपिकितिचेत्यारंभसामर्थ्यादत्रनिषेधोनभवेदितिशंक्यं नाडायनादौतस्यचरितार्थत्वात् भूयादितिइहस्कोरितिलोपस्यासिद्धत्वात्तकारस्यसंयोगांतलोपःप्राप्तः पदांतसंयोगादिलोपेनानवकाशेनबाध्यते नन्वेवमपिसंयोगादिलोपस्यपूर्वत्रासिद्धमितिसिद्धत्वाद्धलङ्यादिलोपःस्यात्पदांतेसंयोगादिलोपस्यभट्भृडित्यादौसावकाशत्वादितिचेदत्राहुःसुट्यासुटोःसतोस्ताभ्यांवि

आदिशब्देनाशंसावचनंगृह्यतइतिव्याख्यायआशंसावचनेलिङ्गेयन्निमित्तंतत्रापिक्रियातिपत्तौभविष्यतिलृङ् गुरुश्चेदायास्यत् आशंसेहमध्येष्येदित्याद्युदा
हरंतिअन्येतुभविष्यतिमर्यादेत्यादिनाभविष्यन्नीत्युपक्रम्ययोयोलिङ्विहितः तन्निमित्तएवक्रियातिपत्तौलृङ् भवतिनान्यत्रेत्याहुः॥ ※ ॥लिङ् निमित्तमिति
हेतुहेतुमतोर्लिङ् इच्छार्थेषुलिङ्लोटावित्यादिलक्षणार्थप्रक्रियायांस्फुटीभविष्यति॥अनिष्यत्तावितिसुवृष्टिश्चेदभविष्यत्तदासुभिक्षमभविष्यदितित्रेवो
दाहरिष्यति॥प्रागेवेति॥नघरतः नापिग्यवहितइत्यर्थः अतएवछंदसिपरेपिव्यवहिताश्चेतिसूत्रितं॥आनिलोट्॥निलोडित्येववक्तव्येआनिग्रहणमागमशा
स्त्रस्यानित्यतांज्ञापयितुं॥तेनसागरंतर्तुकामस्य जघ्नास्तोत्रमित्यादिसिद्धाति॥लोट्ग्रहणंस्यष्टप्रतिपत्त्यर्थं नचप्रकृष्टावपायेषांतानिप्रवपानिमांसानी

लिङ्निमित्तेलृङ् क्रियातिपत्तौ ३।३।१३९॥ हेतुहेतुमद्भावादिलिङ्निमित्तंतत्रभविष्यत्यर्थेलृङ्स्यात् क्रियायाअनिष्यत्तौ
गम्यमानायाम् अभविष्यत् अभविष्यताम् अभविष्यन् अभविष्यः अभविष्यतम् अभविष्यत अभविष्यम् अभविष्याव
अभविष्याम तेप्राग्धातोः १।४।८० तेगत्युपसर्गसंज्ञकाधातोः प्रागेवप्रयोक्तव्याः आनिलोट् ८।४।१९ उपसर्गस्थान्निमित्ता
त्परस्यलोडादेस्यआनीत्यस्यनस्यणःस्यात् प्रभवाणि दुरःषत्वणत्वयोरुपसर्गत्वप्रतिषेधोवक्तव्यः दुःस्थितिः दुर्भवानि अन्तः
शब्दस्याङ्किविधि णत्वेषूपसर्गत्वंवाच्यम् अन्तर्द्वौ अन्तर्द्विः अन्तर्भवाणि ॥ ※ ॥ ※ ॥ ※ ॥ ॥ ॥

त्रापनेननिस्यणत्वंस्यादितिवाच्यं उपसर्गग्रहणादर्थवद्ग्रहणाच्चास्याप्रवृत्तेः प्रातिपदिकां तेतिवैकल्पिकणत्वंतुइष्यतएवदुरः षत्वेतिदु
रः परस्यणत्वंनेति केचिदितिप्राचोक्तंलघुक्तं एवंहिसिद्धांतेणत्वंस्यात् तच्चाकरविरुद्धमितिभावः॥अंतर्द्वैति आतश्चोपसर्गइत्यङ् टाप् अंत
र्द्विरितिउपसर्गेघोंकिःअच्छद्यस्याङ्विधावुपसर्गत्वमुपसंख्यायते तच्चप्रकृतावुपयोगादुपेक्षितं भिदादिपाठेनप्रज्ञाश्रद्धेतिनिपातनेनवाग

भाष्यकारस्त्वाह: अस्तिसिचोपृक्तं इतिद्विसकारकोयंनिर्देशइति अत्रमाधव:अस्सइतिसमुदायस्याधातुतपाइक्ष्मिपौधातुनिर्देशइतिक्ष्मिपप्रत्ययोन
स्यादिति अत्रवदंति द्विसकारकनिर्देशक्ष्मिपूनस्यादितिपदुक्तंतद्भसोक्तिमात्रं इत्थंहिभाष्याशय:सिचइत्यस्यानंतरंसकार: प्रक्ष्मिष्यतेनतुक्ष्मिप:प्राक् अत
एवसिचोपृक्तइतिद्विसकारकोयंनिर्देशइत्युक्तंभाष्येअन्यथाअस्तीतिनिर्देशोद्विसकारकइत्येववूयात् एवंचसांतादस्ते:सांतात्सिचइतिचार्थोनिर्बाधएवद्वि
तीयश्चसकारोलुप्यतेसंयोगांतस्यपदांतस्येतिव्याख्यानात् व्यपदेशिवद्भावेनपदांतत्वात् द्वितीयसकारस्यनचसंयोगांतलोपस्यासिद्धत्वादतोरोरित्युत्वंदुर्लभमि
तिवाच्यं संयोगांतलोपोरोरुत्वेइतिवार्तिकेनासिद्धत्वनिषेधात् संयोगांतयत्पदमितिव्याख्यानेतुनेहसंयोगांतलोप: किंतुसकारद्वयस्यापिरुत्वेकृतेअतोरोरित्यने
नएकएवउकारोभविष्यतिविधेयविशेषणस्यैकत्वस्यपक्षेकत्ववद्विवक्षितत्वात् नचस्थानिभेदे नउकारद्वयेसत्यपिनसंतति: सवर्णदीर्घानंतरमाद्गुणेसतिसमी
हितरूपसिद्धेरितिवाच्यंएकपदाश्रयत्वेनांतरंगत्वादाद्गुणेपश्चादवादेशप्रवृत्त्यासिचोपृक्तइतिरूपासिद्धे: तस्मादुक्तरीत्याएकएवोकारइतिस्वीकर्त्तव्यमतएव

आत:३।४।१११।सिज्लुक्यादन्तादेवमेर्जुस्स्यात् अभूवन् अभू:अभूतं अभूत अभूवं अभूव अभूम नमाङ्योगे ४।४।७४ अङा

टौनस्त:माभवान्भूत् मास्मभवत् भूद्वा ॥ ॥ विधेयगतैकत्वस्यविवक्षितत्वात्एक: पूर्वपरयोरित्यत्रएकग्रहणंभाष्यादौप्रत्याख्यातं नन्वति
परेयोरु:सत्वात:परोनभवति अत:परस्तुअतिपूर्वोनभवतीतिरुत्वस्यानेकथमुकार:स्यान्मेवरोरितिजातिपरनिर्देशेनात्त:परत्वस्यपूर्वत्वस्यचसंभवात् न
चैवमपिपरत्वाद्भशिचेति प्रथमस्यैवरोरु:स्यादितिवाच्यं रुत्वस्यासिद्धतयाहश्परत्वाभावात् नचाश्रयात्सिद्धत्वमितिवाच्यं स्यान्यशेतथात्वेपिनिमित्तभूतहश
शेतदसंभवात् यद्यपिसत्वजातेरेकत्वादुभयोरपिएकएवरुर्भवतीतिव्याख्यायांनायंक्लेशस्तथापिरुत्वविधौपदस्येत्यनुवर्त्तनादेकपदांतत्वंनसंभवति द्वितीय
सकारस्यष्टथक्पदत्वादित्याहु:अष्टक्तहलइति अष्टक्तसार्वधातुकस्येतिप्राचोक्तंतुअयुक्तं ऐधिषिद्त्यादावतिव्याप्ते:सार्वधातुकग्रहणव्यावर्त्यालाभाच्च॥
॥ ॐ ॥आत:सिज्ग्रहणमनुवर्त्ततेमेर्जुसितिचसिचआकाराच्चपरस्यमेर्जुस् तत्रप्रत्ययलक्षणेनसिच: परत्वमाकारानुश्रुत्या एवंस्थितेफलितमाहसि
ज्लुकीति गातिस्थेतिसूत्रेणेत्यर्थ: सिजभ्यस्तेतिपूर्वसूत्रेणैवादंतादपि सिद्धेनियमार्थोयमित्याह आदंतादेवेति हेतुहेतुमद्भावादीतिअत्रकेचित्

॥थासः से।एकारोच्चारणज्ञापनार्थमितिलिटस्तझयोरित्यत्रस्फुटीभविष्यति।अतोगुणेदृति।इदः एत्वेकृतेआदुणंबाधित्वाऽद्धौप्राप्तायांअनेनपररूपमित्यर्थः। इजादेश्च।धातोरेकाचइत्यतोधातुग्रहणंकास्प्रत्ययादित्यतआम्लिटितिचाऽनुवर्ततइत्याह।इजादिर्योधातुरित्यादि।गुरुमान्किं।इयेष।ऋच्छेरित्यान च्छे।आमः।लक्षणप्रतिपदोक्तपरिभाषयाप्रत्ययग्रहणपरिभाषयाचनेह । आम।आमतुः।परस्यलुगिति।मंत्रेघसेतिसूत्राल्लेरित्यनुवर्त्यलेर्लुगिति कौशिकादौव्याख्यातंतदत्रोपेक्षितव्यावर्त्यालाभात्।तिङोपवादत्वाल्लावस्थायामेवायंलुक्।तेनआमंतस्यातिङं·तत्वात्देवदत्तादिपदात्परत्वेपितिङ्: तिङ· इतिनिघातः।आमंतात्परस्यनिघातश्चतिङं·तस्येत्यर्थः।नचातिङं·तत्वेपदत्वाभावादामंतात्परस्यनिघातोनसिध्यतीतिशंक्यं।लिटः कित्वात्प्रत्यय

थासस्से।३।४।८०टितोलस्यथासस्सेस्यात्।एधसे।एधेये।एधध्वे।अतोगुणे।एधे।एधावहे।एधामहे।इजादेश्चगुरुमतोऽनृच्छः।३।१।३६इजादि र्योधातुर्गुरुमान्नृच्छत्यन्यस्तताआम्स्यात्लिटि।आमोमकारस्यनेत्वमास्कासोरम्विधानात् ज्ञापकात्।आमः।२।४।८१आमः परस्यलुक्स्यात् कृञ्ञानुप्रयुज्यतेलिटि ३।१।४०आमन्ताल्लिट्परःकृभ्वस्तयोनुप्रयुज्यन्ते।आम्प्रत्ययवत्कृञोऽनुप्रयोगस्येतिसूत्रेकृञ्ग्रहणसामर्थ्यादनुप्रयो गोन्यस्यापीतिज्ञायते।तेनकृभ्वस्तियोगइत्यतःकृञोद्वितीयेतिञकारेणप्रत्याहाराश्रयणात्कृभ्वस्तिलाभः।तेषांक्रियासामान्यवाचित्वादाम्प्रकृ तीनांविशेषवाचित्वात्तदर्थयोरभेदान्वयः।संपदिस्तुप्रत्याहारेऽन्तर्भूतोप्यनन्वितार्थत्वान्नप्रयुज्यते।कृञस्तुक्रियाफलेपरगामिनिपरस्मैपदेप्राप्ते॥

लक्षणेनकृदंततयाप्रातिपदिकत्वेसोरुत्यत्तावामंतस्याव्ययत्वात्सुपोलुक्यपिप्रत्ययलक्षणेनसुबंततयापदत्वात्।कृञ्चानुप्रयुज्यते।कथंतर्हितेपातयांप्रथममा सपपातपश्चात्।प्रभ्रंसयांयोनहुषंचकारेति।प्रमादएवामंनचविपरीतप्रयोगनिवृत्तिमात्रेसूत्रस्यतात्पर्यात्पश्चात्प्रयोगोव्यवहितोपिनदुष्यतीति वाच्यंविपर्यास निवृत्त्यर्थेव्यवहितनिवृत्त्यर्थंचेतिवार्तिकाविरोधात्।अन्यस्यापीति।यदिइहकृञ् शब्देनएकएवधातुर्गृह्येततदाधातंतरस्यप्राप्त्यभावादाम् प्रत्ययवत् इतिसूत्रे नुप्रयुज्यमानस्यकृञइतिविशेषणंव्यर्थंस्यादितिभावः।नचात्रकृञ्चेतिचकारेणैवाऽनुप्रयोगोन्यस्यापीतिज्ञायतइतिशंक्यं।धातोरम्स्यात् अनुप्रयुज्यतेचलि रामः ट्परःकृञइत्यर्थसमर्पकतयातस्योपस्थीणत्वात्।अभेदान्वयइति।सामान्यविशेषयोरभेदान्वयोलोकसिद्धइतिभावः।एवंचएधांचक्रेएधांबभूवेत्यादौएक। १५

शेषेविभाषा। नेर्गदनदेतिसूत्रोक्तापेक्षयाशेषइत्याह। गदनदादेरन्यस्मिन्निति।उपदेशेकिं। प्रनिचकार। प्रनिचखादेत्यत्रापिनिषेधोयथास्यात्।अथा
न्तेतिकिं।प्रनिपिनष्टि।उपदेशग्रहणात् प्रनिपेस्यतिचसिद्धः ख्याञ्। प्रनिचक्शेइत्यत्रापिनिषेधः।शेषग्रहणंस्पष्टार्थं॥णत्वशास्त्रेसंहितायामित्यधिकार
त् संहितायामविवक्षितायांणत्वाभावः संहितायांतुणत्वमितिविकल्पसिद्धेः किमनेनविभाषाग्रहणेनेत्याशंकानकार्यत्याह। इहोपसर्गाणामित्यादि एक
पदइत्यनेनैवसिद्धेसमासग्रहणंगोबलीवर्दन्यायेनेतिबोध्यं। वाक्येतिति। सासंहिताविवक्षाधीनानत्वत्रनित्येत्यर्थः।उपलक्षणमिति।एतच्चसत्ताद्यर्थनि
-शंकृतवतोभीमसेनस्यापिसंमतमित्यत्रकुर्दंखुर्दंगुर्दंगुदक्रीडायामेवेत्येवकारोज्ञापकः।सेधतेर्गतावित्यत्रेगतावित्येतदपिषिधगत्यामित्याद्यर्थनिर्दे

शेषेविभाषाःकखादावःषान्तउपदेशे।८।४।१८ उपदेशेकादिखादिर्षांतवर्ज्जेगदनदादेरन्यस्मिन् धातौपरेउपसर्गस्थान्निमित्तात्पर
स्यनेर्नस्यणत्वम्वास्यात्।प्रणिभवति।प्रनिभवति।इहोपसर्गाणामसमस्तत्वेपिसंहितानित्या।तदुक्तं।संहितैकपदेनित्यानित्याधातूपसर्गयोः।नि
त्यासमासेवाक्येतुसाविवक्षामपेक्षतेइति।सत्ताद्यर्थनिर्देशश्चोपलक्षणं।यागात्स्वर्गोभवतीत्यादावुत्पद्यतइत्याद्यर्थावगमात्।उपसर्गास्त्वर्थविशे
षस्यद्योतकाः।प्रभवति।पराभवति।संभवति अनुभवति।अभिभवति।उद्भवति।परिभवतीत्यत्रविलक्षणार्थावगतेः।उक्तंच।उपसर्गेणधात्व
र्थोबलादन्यत्रनीयते।प्रहाराहारसंहारविहारपरिहारवदिति एधवृद्धौ।कर्त्तृयंताःषट्त्रिंशदनुदात्तेतः।टितआत्मनेपदानामटेरे।३।४।७९।टि
तोलस्यात्मनेपदानांटेरेत्वंस्यात्।एधत्ते।सार्वधातुकमपित्।१।२।४।अपित्सार्वधातुकंङिद्वत्स्यात्।आतोङितः।७।२।८१अतःपरस्यङितामा
कारस्यइयस्यात्।एधेते।एधन्ते॥ ९९शस्योपलक्षणत्वएवघटतेनान्यथेतिदिक्।उत्पद्यतइत्याद्यर्थादिति।एवंचउपसर्गविनाप्युत्सत्यर्थप्रतीतेरुद्भवतीत्या
दौप्रयुज्यमानोप्युपसर्गःद्योतकएवनतुवाचकइतिभावः।उपसर्गेणधात्वर्थइति।अतएवाऽमरेणाप्युक्तं।स्यादाभाषणमालापः प्रलापोनर्थकंवचः॥अनुलापोनु
भाषाविलापःपरिदेवनं॥विप्रलापोविरोधोक्तिःसंलापोभाषणंमिथः।सुप्रलापःसुवचनमपलापस्तुनिन्हवइति।टितआत्मने।ननुशानचोपिलस्यानिकात्मनेप
दत्वात्सचमानोयजमानइत्यत्रटेरेत्वेनभवितव्यमितिचेदत्राहुः।प्रक्रुतैस्तिवादिभिरात्मनेपदानांविशेषणान्नदोषः।एवंतुटितस्तङानटेरेइत्येववक्तुमुचितमि।

॥द्विर्वचनेचि।अचासामानाधिकरण्यलाभायद्विर्वचनशब्दस्यतन्निमित्तेलक्षणास्वीक्रियते।यद्वा।उच्यतेद्वितिवचनं।द्विर्वचनंयस्मिन्नचितद्विर्वचनं।अथवा द्विर्वचनमस्मिन्नस्तीत्यर्श आद्यच्।तदेतदाह द्वित्वनिमित्तेऽचीति।इहअचः परस्मिन्नित्यतोऽच्इतिस्थानिवदादेशइत्यस्मादादेशइतिनपदांतेत्यतोनेतिचानुवर्त्तेतदाह।अचआदेशोनस्यादिति यद्यपीहह्रस्वादावजादेशः स्थानिवत्स्यादितिरूपातिदेशपक्षःस्वीकृतः फलंचोभयत्रतुल्यंतथाप्यादेशनिषेधपक्षोपिभाष्यारूढइतिसएवात्रस्वीकृतः किंच।आदेशमंगीकृत्यपुनःस्थानिरूपाश्रयणापेक्षयानिषेधपरतयाव्याख्यानमेवलघु।प्रक्षालनाद्धिपंकस्यदूरादस्पर्शनंवरमितिन्यात्।नपदांतेतिनिषेधानंतरंपाठोप्येवंसत्यनुगृहीतइतिश्रेयानयंपक्षः।इष्टानुरोधेनद्विर्वचनइत्यावर्त्यकालावधारणपरतयापिव्याचष्टे।द्वित्वेकर्त्तव्येइति।कृतेतु

द्विर्वचनेऽचि।१।१।५९द्वित्वनिमित्तेऽचिपरेअचआदेशोनस्यात्।द्वित्वेकर्त्तव्ये।उरत्।७।४।६६अभ्यासऋवर्णस्यअत्स्यात्प्रत्ययेपरे।र परत्वं।हलादिःशेषः प्रत्ययेकिं। वव्रश्च।कुहोश्चुः।७।४।६२।अभ्यासकवर्गहकारयोश्चवर्गादेशःस्यात्।एधाञ्चक्रे।एधाञ्चक्राते।एधाञ्च क्रिरे।एकाचउपदेशेऽनुदात्तात्।७।२।१०।उपदेशेयोधातुरेकाच् अनुदात्तश्चततः परस्यवलादेरार्द्धधातुकस्येण्नस्यात्।उपदेशेऽल्लुभयान्वयि।एकाच इतिकिम्।यङ्लुग्व्यावृत्तिर्यथास्यात्।स्मरन्तिहि।श्तिपाशपानुवंधेननिर्दिष्टंयद्गणेनच।यत्रैकाज्ग्रहणंचैवपंचैतानिनयङ्लुकीति।एतच्चैहैवैकाज्ग्रहणेनज्ञाप्यते।अचइत्येवैकत्वविवक्षयातद्धितोग्रहणेनचसिद्धेएकग्रहणसामर्थ्यादनेकाच्कोपदेशोव्यावर्त्यते।तेनवधेर्हल्युपदेशेएकाचोपिननिषेधः।आदेशोपदेशेऽनेकाच्त्वात्।अनुदात्ताश्चानुपदमेवसंग्रहीष्यंते।एधांचक्रुषेएधाञ्चक्राथे ॥

द्वित्वेययायथमादेशः स्यादेवेतिभावः।द्वित्वनिमित्तेकिं।दुद्यूषतीत्यत्रद्वित्वात्परत्वात् ऊठिकृतेयदियणः पूर्वमेवद्वित्वंस्यात् तदादिद्यूषतीत्यनिष्टरुपंस्यात्त भूदितिद्वित्वनिमित्तइत्युक्तं।नत्वूठद्वित्वनिमित्तं।अचीतिकिं।जेघ्रीयते।देध्मीयते।शाशय्यते इहहर्यादेशोरिति ईकारः।अयङ्यिङ्वीत्ययङादेशश्चनिषिद्धो तसमाभूदितिप्रांचः।अन्येत्वाहुः।अचीतिव्यर्थंघ्रीयध्मीयशय्यइतिद्वितीयाजवधिकस्यैकाचःकार्यितयायङोद्वित्वनिमित्तत्वाभावोदिति।अचः किंअस्यु एमः
षुपत।इहस्यापेश्चङीतियत्संप्रसारणंतस्मिन्निषिद्धेऽभ्यासेउवर्णोनश्रूयेत। नचद्वित्वेकृतेपुनः संप्रसारणेस्यापेरवयवत्वाविशेषाद्भ्यासेतदुत्तरखंडे— १६

कर्तृकभूतानद्यतनपरोक्षाद्यर्थाभिन्नाक्रियेतितुल्योबोधः।ननुकरोतिः सकर्मकः भवतिस्त्वकर्मकइतिकथमिहतुल्यतेतिचेदत्राहुः।यदाहिकरोतिरुत्पादनार्थकःसा
तंत्र्येणप्रयुज्यतेघटंचक्रेराज्यंचकारेतितदानियमेनसकर्मकत्वंयदातुक्रियांतरसमानाधिकरणः करोतिः प्रयुज्यतेजुहवांचकारेत्यादौतदायत्समानाधिकर
णःकरोतिस्तस्यसकर्मकत्वाकर्मकत्वाभ्यांखयमपितथाभावंभजते।एवंभ्वस्योरप्याम्प्रकृतिसामानाधिकरण्येनकचित्सकर्मकत्वंबोध्यमतएवानुप्रयुज्यमा
नाद्भवतेः सकर्मकत्वात्कर्मणिलिट्।तथाचमाघः।तस्याःतपत्रंविभरांबभूवेइति।श्रीहर्षश्चातपर्तुपूतीवपिमेदसांभराविभावरीभिर्विभरांबभूविरेइति।अत्रे
दमवधेयंजुहावजुहुवांचकार।जुहुवांबभूवेत्यादौकेवलेहोमोगम्यतेइतरत्रतुहोमरूपाक्रियेतिबोधः फलेतुनकश्चिद्विशेषः।घटमानयद्रव्यंघटमानयेत्य

आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य१।३।६३आम्प्रत्ययोयस्मादित्यतद्गुणसंविज्ञानोबहुव्रीहिः।आम्प्रकृत्यातुल्यमनुप्रयुज्यमानात्कृञोप्यात्म
नेपदंस्यात्।इहपूर्ववदित्यनुवर्त्यवाक्यभेदेनसंबध्यते।पूर्ववदेवात्मनेपदमत्रतुनहिपरोक्षमिति।तेनकर्त्रर्थेपिक्रियाफलेइन्द्राञ्चका
रेत्यादौनतङ्।लिटस्तझयोरेशिरेच्३।४।८१लिडादेशयोस्तझयोरेशिरेच्एतौस्तः।एकारोच्चारणंज्ञापकंतङादेशानांटेरेत्वनेति।तेनडा
रौरस्यात्राकृण्इतिस्थिते।असंयोगाल्लिट्कित्१।२।५असंयोगात्परोपिल्लिट्कित्स्यात्।क्ङितिचेतिनिषेधात्सार्वधातुकार्धधातुकयोरिति
गुणोन द्वित्वात्परत्वाद्यणिप्राप्ते ॥ ९ त्रयस्या।एवंचाम्प्रकृत्यर्थगतकारकसंख्यादिविशेषाभिव्यक्तिरनुप्रयोगस्यफलमिति।अनन्वितेति संपद्यर्थस्या
म्प्रकृत्यर्थस्यचाभेदान्वयोनसंभवतिउभयोरपिविशेषरूपादितिभावः॥ ॥आम्प्रत्ययवत् आम्प्रत्ययांतस्यात्मनेपदाभावादाह।अतद्गुणइति। प्रकृत्या
तुल्यमनुप्रयुज्यमानादिति।तृतीयांताद्वतिः।अनुप्रयोगस्येत्यत्रकर्मणिषष्ठीतिभावः।अनुदात्तङितइत्यतोऽनुवर्तनादाह।आत्मनेपदंस्यादिति एवमप्राप्त
स्यविधानेपिप्राप्तस्यनिवारणमनेनैवसूत्रेणनसंभवतीत्यतआह।वाक्यभेदेनेति।अत्रचप्रमाणमाम् प्रत्ययवदितिवचनमेव।अन्यथापूर्ववदित्यनुवर्त्यैवा
ऽनुप्रयोगस्यकृञःआमःपूर्वेणतुल्यमित्यर्थलाभादिष्टसिद्धेःकिंतेनआम् प्रत्ययवदित्यनेन।लिटस्तझयोः।शिशितिशकारकरणमकारविशिष्टतकारस्यादेशत्वापभ

संयोगात्।असंयोगादिति किमर्थमत्रतनप्रत्यय ॥

स्यादेवेत्याशंकायामाह।स्मरंतिहीति।श्तिपेत्यादिश्तिपायथा।स्यतिहंतियातिवातिद्रातीत्यादि।तेनप्रन्यजंघनीदित्यादौनेर्गदेतिणत्वंनशपायथा।भरेति।तेननिभर्तैःसनिबर्भरिषतीत्यत्रसनीवतर्दृतीट्विकल्पोनकिंतुनित्यमेवेट्।एकाच्इतिनिषेधाप्रवृत्तेः।अनुबंधेननिर्देशोद्विधा।स्वरूपेणेत्संज्ञकत्वेनच।स्वरूपेणयथा।शीङःसार्वधातुकेगुणः।दीङोयुडचीति।शेशीतः।देद्यीतः।तस्मिक्तप्रत्ययेचेमेक्रमेणोदाहरणे।इत्संज्ञकत्वेनयथा।अनुदात्तंङितः।तेनस्पर्द्धेशीङादिभ्यःअनुदात्तंङितइत्यात्मनेपदं।पास्पर्द्धीति।शेशयीति।गुणेनयथा।वेभिदीति।रुधादिभ्यइतिश्नम्।एकाच्ग्रहणंप्रकृतसूत्रे।तेनवेभेदितावेच्छेदितेत्यादाविण्निषेधोने।एतच्चेति।नचस्तिपाशपाद्यंशंकथमिदंज्ञापकमितिशंक्यं।एकदेशानुमतिद्वारासर्वज्ञापनस्योपपदमितिङित्यादौदृष्टत्वात्।अतएवतत्रगतिकारकोपपदानांकृद्भिःसहसमासवचनंप्राक्सुबुत्पत्तेरितिसिद्धमित्युक्तं।अनन्यार्थैःस्यतिहंतिभरेत्यादिभिःस्तिवादिभिरेवज्ञापनसंभवाच्च।अपरस्याइतिसूत्रेसातत्यग्रहणेनएकदेशानुमत्यालुपेदवश्यमःकृत्येट्त्यादिपूर्वाचार्यश्लोकोज्ञापितइतितुतत्रावोचामः।मनोरमायांत्वेकदेशानुमतिद्वारापूर्वाचार्यपठितपरिभाषायाःज्ञापनस्यगतिकारकोपपदानामित्यादौदृष्टत्वादित्युक्तंतदयुक्तमितिनव्याः।गतिकारकोपपदानामित्याद्येवहिपूर्वाचार्याणांपरिभाषानचतज्ज्ञापनं तत्रैवदृष्टमितियुज्यतेवक्तुमिति।तदूतइति।नचमत्वर्थलक्षणायांमानाभावः।वसत्यादीनामनुदात्तपाठस्यैवतत्रमानत्वात्।नचेदानीमनुदात्तपाठःपरिभ्रष्टःआधुनिकानांवसतिशक्तीत्यादिपाठस्तुअनार्षत्वान्नमानमितिशंक्यं।पाणिनिनापठितानामेवानुदात्तधातूनामाधुनिकैःआख्यातपरंपरयासंगृहीतत्वात्।अन्यथाएकःअच्पस्येतिबहुव्रीहिलाभार्थमेकग्रहणेकृतेपिअनुदात्तपाठस्यपरिभ्रष्टत्वात्वसतिशक्त्यादयोनुदात्ताः नतुभ्वेधादय इतिनिर्द्धारणंनस्यात्।एकग्रहणेति।नन्वेकाच्ग्रहणंयङ्लुग्व्यावृत्त्यर्थमित्युक्तोपनरेकग्रहणसामर्थ्यादित्युक्तौपरस्परव्याघातःस्यादितिचेदत्राहुः।एकाच्शब्देनएकाच्ग्रहणंयङ्लुग्व्यावृत्त्यर्थमितिनार्थः किंतुवस्तुगत्यैवैकाज्ग्रहणंतच्चैकग्रहणंविनैवलभ्यतइत्यदोषइति।वधेरिति।यस्तुतव्यावृत्तयेअनिट्कारिकासुअदंतपर्युदासउक्तोव्याघ्रभूतिनासएवप्राचांनुसृतः।अदूदंतरुरुष्णुशीयुसुस्विदीङ्भ्रिभिः।वृङ्वृञ्भ्यांचविनै

चउकारश्रवणंभवेदितिवाच्यं।परस्यसंप्रसारणेकृतेयूनद्त्यत्रेवनसंप्रसारणइतिपूर्वस्ययणःसंप्रसारणनिषेधात्।स्यादेतत्। चक्रतुरित्यत्रअचआ
देशस्यनिषेधाप्रवृत्त्यायण्स्यादेव।अतुसोर्हित्वनिमित्तत्वेपिअकारस्याऽतथात्वात्।नचद्विर्वचनेचीत्यस्यवैय्यर्थ्यं। चक्रेइत्यादौसावकाशत्वात्।तथा
चैकाचत्वाभावाल्लिटिधातोरितीहद्वित्वनस्यादितिचेन्नैवंइहद्वित्वनिमित्तशब्देनसाक्षाद्वासमुदायघटकतयावायत्द्वित्वप्रयोजकंलस्याउरोधेनत
स्यसर्वस्यग्रहणात्।एतच्चठसेकइतिसूत्रेकैयटेस्पष्टं।तथाचऊर्णोतेः सनि।सनीबंतेतीट्। पक्षेविभाषोर्णोरितिडि·त्वविरहेऊर्णुनविषतीतिसिद्धंस
न्नेतस्यद्वित्वविधानेसनोद्वित्वप्रयोजकत्वेनतस्मिन्परेप्राप्तयोर्गुणावादेशयोर्द्वित्वेकर्तव्येनिषेधात्।अतएवाहुस्तद्भावभावितामात्रेणेहनिमित्तत्व
मिति।एवंचद्वित्वनिमित्तघटकतयासनइडागमोअतुसअकारश्चद्वित्वनिमित्तमितिस्थितं।नन्वेवंऋधातोः सनिस्मिपूङ्रंज्वशंसनीतिइटिकृतेदस्
शब्दनिमित्तकस्यगुणस्यद्विर्वचनेऽचीतिनिषेधेऽजादेर्द्वितीयस्येतिद्वित्वप्रसंगादरिरिषतीतिनसिध्येत्।रिस्शब्दस्यद्वित्वेतुयद्यपिसिद्ध्यति तथा
पिगुणनिषेधेरिस्शद्बएवदुर्लभइतिचेत् अत्राहुः।गुणेरपरेकृतेरिस्शद्बस्यैवद्वित्वंद्वित्वनिमित्तेह्यचिगुणस्यनिषेधः।इस्शब्दस्तुनेहनिमित्तकार्यि
त्वात्।नहि तर्हिकार्यीनिमित्ततयाऽश्रीयते।स्यंडिलाच्छ्यितरित्वतइतिज्ञापकात् अन्यथाशीङोडि·त्वेनङ्कितिचेतिगुणनिषेधाच्छ्यितरीतिरूपस्यासि
द्ध्यापत्तेः।नचकितिडि·तिपरेगुणवृद्धीनेतिव्याख्यायामुक्तार्थैश्शयितरीतिनज्ञापकमितिवाच्यं।तद्व्याख्यायांह्यिन्वंभिन्नमित्यत्रगुणनिषेधोनस्यादित्या
दि दोषस्यङ्कितिचेतिसूत्रएवोपपादितत्वात्।नचैवंकार्यिणोनिमित्तत्वानाश्रयणेसन्नेतस्यकार्यित्वात्सनिपरतःप्राप्तयोः गुणावादेशयोरनिषेधादुर्णुनवि
षतीत्यपिनस्यादितिवाच्यं।मत्वर्थीयेनिनाकार्यमनुभवतएवकार्यित्वलाभात्।उर्णोतेर्हिनुशब्दएवद्वित्वरूपकार्यमनुभवतिनतुसन्।अरिरिषतीत्यत्र
तुरिस्शब्दःकार्यभागितिवैषम्यादिति।उभयान्वयीति।मध्येपाठाद्हलीदीपन्यायेनपूर्वोत्तराभ्यांसंबध्यतइत्यर्थः।तत्रोत्तरान्वयस्यकर्तुंगंतुमित्यादाविण्
निषेधःफलं।नित्स्वरेणसंप्रत्युदात्तत्वात्पिपक्षतिविभत्सतीत्यादाविण्निषेधस्तुपूर्वान्वयस्यफलं।द्वित्वेकृतेऽनेकाच्त्वात्।नन्वेकाचइत्युक्तेह्युपदेश
पदेनाप्यन्वयःस्वीकर्तव्यस्तदेवमास्तुउपदेशेऽनुदात्तादित्यनेनैवेष्टसिद्धेरितिशंकते। एकाचः किमिति।पिपक्षतीत्यादाविवयङ्लुक्यपिइण्निषेधः

द्वयस्यैवलाभार्थं प्रत्याहारआश्रयणेक्लेशइतिभावः। पररूपापवादइति। अपवादइत्ययंग्रंथोनामधातुप्रक्रियास्थस्यग्रंथेनसहविरुध्यते। तत्रहिअट्वा चरतिअति। प्रत्ययग्रहणमपनीयकास्यनेकाच्इत्यनेनाम्। औ। अतुःउः हिल्वमतोगुणे। अतआदेरितिदीर्घः। णलऔ। वृद्धिरित्युक्तत्वात्। हलादिःशेषा त्प्रागेवपरत्वादतआदेरितिदीर्घेकृतेतुपररूपशंकापिअत्रनास्तीतिचिंत्योयंग्रंथइतिनव्याः॥ ॥ ॥आडजादीनां। एतच्चाजादीनामदासिद्धमितिवा र्तिककृताप्रत्याख्यातं। ननुअटिसतिवृद्धिरेचीत्यनेनएधतेत्यादिसिद्धावपिऐंदित्यादिनसिध्येत्। किंच। अतोगुणेइतिपररूपप्रवृत्त्याऐधतेत्याद्यपिन सिद्ध्येत्। यदित्वाटश्नेतिसूत्रमटश्नेतिक्रीयेततर्हिअस्यपोहसत्इत्यत्रवृद्धिःस्यात्। रुदश्पंचभ्यःअट्गार्ग्यगालवयोरितिअडागमस्यसत्वादतोरोरप्लुता

आडजादीनां। ६।४।७२। अजादीनामाट्स्यात्लुङादिषु। अदोपवादः। आटश्नोः। ऐधत। ऐधेतां। ऐधंत। ऐधथाः। ऐधेथां। ऐधध्वम्। ऐधे। ऐधावहि। ऐधामहि। लिङःसीयुट्। ३।४।१०३। लिङ्निमित्तमेयदस्यसीयुडागमःस्यात्। सलोपः। एधेत। एधेयातां। झस्यरन्। ३।४।१०५। लिङोझस्यरन्स्यात्। एधेरन्। एधेथाः। एधेयाथां। एधेध्वं। इटोऽत्। ३।४।१०६। लिङादेशस्येटोऽत्स्यात्। एधेय। एधेवहि। एधेमहि। आशीर्लिङि। आर्द्धधातुकत्वात्लिङःसलोपोनासीयुट्सुटोः प्रत्ययावयवत्वात्षत्वं। एधिषीष्ट। एधिषीयास्तां। एधिषीरन्। एधिषीष्ठाः। एधिषीयास्थां। एधिषीध्वं। एधिषीय। एधिषीवहि। एधिषीमहि। ऐधिष्ट। ऐधिषातां ॥ ९ दितिरोरुलेसति अच्परत्वाच्चेतिचेन्न। उपसर्गादृतिधातावित्यतोधातावित्यपकृष्याजादौधातावितिव्याख्यानात्। नचअस्यपोस्तीत्यादावोकारस्यांतवद्भावेनाट्त्वात्परत्वाजादिधातुसत्वाच्चोक्तदोषस्तदवस्थइतिवाच्यं। आदिस्तुवर्त्सअकाररूपादटोऽविपरे वृद्धिरितिव्याख्यानात्। एतेनअटश्नेत्युक्त्वावर्णगतावित्यस्मात्त्यटिअटनमित्यत्रा तिप्रसंगःस्यादित्येतदपिनिरस्तं। नचैवमपिआतश्चातीत्यादिनसित्यति। अटश्नेत्यस्यऐंदित्यादौसावकाशतयापरत्वादिहअतोगुणस्यैवप्रवृ त्तेरितिवाच्यं। चकारोत्रपुनर्वृद्धिविधानार्थइत्यभ्युपगमादंतरंगत्वाद्वाअटश्नेत्यस्यैवप्रवृत्तेः। स्यादेतत्। आडजादीनामितिसूत्राभावेआस्तामासन् इतिक थमटासिध्यति। असोरित्यल्लोपेनअटश्नेतितत्रवृद्ध्यप्रवृत्तेः। मैवं। अंतरंगत्वात्प्रागेवाडागमेकृतेवृद्धौचकृतायांपश्चात्असोरल्लोपस्याप्रसक्तेः।

काचःस्वरांताधातवोनिटइति।सचादंतपर्युदासइहोपेक्षितः।सूत्राऽननुगुणत्वात्।तथाहि।सर्वेसर्वपदादेशाइतिन्यायेनकृदादेः करित्यादेशस्तस्यय
थास्थान्युपदेशंगृह्णात्वाकर्तार्हर्तेत्यादौनिषेधः प्रवर्ततेतथैववधादेशेपिप्रवर्तमानः केनवार्यतांअदंतपर्युदाससामर्थ्यादितिचेन्नासूत्रकारेणाऽपर्युद
स्तत्वादितिभावः॥ ॥ इणः षीध्वंइणकोरित्यधिकारेपिपुनरिण्ग्रहणंकवर्गात्परस्यमाभूदित्येतदर्थं।तेनेहन।पक्षीध्वं।अंगात्परेषामिति।विहितानां
मित्युक्तौतुदाज्ञोलुडि।।अदिङ्मित्यत्राव्याप्तिः स्यात्लिहदुहनहांढत्वघत्वधत्वेषुलिक्षीध्वंधुक्षीध्वंनक्षीध्वमित्यत्राऽतिव्याप्तिश्चस्यादितिवोध्यं।अंगात्किं।
विविषीध्वं।यद्यप्यर्थवतः षीध्वमित्यस्यग्रहणात्कृषीङ्मित्यादावेवभवेन्नत्वत्रतथाप्यर्थवद्ग्रहणपरिभाषाक्वचिन्नप्रवर्ततइतिज्ञापनार्थमिदमुक्तं।तेनअ

इणः षीध्वंलुङ्लिटांधोऽङ्गात् ८।३।७८।इणन्तादङ्गात्परेषांषीध्वंलुङ्लिटांधस्यमूर्धन्यःस्यात्।एधांचक्रुढ्वेएधांचक्रे।एधांचक्रुवहेएधांचक्रु
महेएधांबभूवइत्यादि।अनुप्रयोगसामर्थ्यादस्तेर्भूभावोना।अन्यथाहिक्रसत्त्वानुप्रयुज्यतइतिकृभ्वितिवावूयात्।अतआदेः।७।४।७७।अभ्यास
स्यादेरतोदीर्घःस्यात्।पररूपापवादः।एधामासाएधामासतुरित्यादि।एधिताएधितारौ।एधितारः।एधितासेएधितासाथे।धिच ८।२।२५धादौप्रत्य
येपरेसलोपःस्यात्।एधिताध्वेहएति।७।४।५२तासस्योःसस्यहस्यादेतिपरे।एधिताहे।एधितास्वहे।एधितास्महे।एधिष्यते।एधिष्येते।एधिष्यंते
एधिष्यसे एधिष्येथे।एधिष्यध्वे।एधिष्ये।एधिष्यावहे एधिष्यामहे।आमेतः।३।४।८०लोटएकारस्यामस्यात्।एधतां।एधेतां।एधन्तां।सवाभ्यांम्वा
मौ३।४।८१।सवाभ्यांपरस्यलोडेतःक्रमाद्धअम्एतौस्तः।एधस्व।एधेथां।एधध्वं एतरे३।४।८२लोडुत्तमस्यएतऐस्यात्।आमोपवादःएधै।एधावहै।

निनस्मन्ग्रहणानीतिसिद्धं।एधांबभूवेत्यादि।आम्प्रत्ययवदितिसूत्रेकृञ्ग्रहणात् अनुप्रयोगांतरेतङ्नेतिशेषात् कर्तरीतिपरस्मैपदमेवांभाव
कर्मणोस्तुस्यादेवएधांबभूवेईक्षांवभूवेइति।अस्तेस्तुभावकर्मणोस्तङि.कृतेएधिइदिचरूपेविप्रतिषेद्धव्यते।तथाहि।उभयत्रापिहएतीतिहादेशे
कृतेएधामाहेईक्षामाहेइतिकेचित्।नासिसाहचर्यादिल्येवहत्वंनत्वेशीत्यन्ये।तस्साहचर्यादेवसार्वधातुकएवएतिहत्वं।तथाचकर्मव्यतिहारेत
ङि.व्यतिहेइत्यत्रैवभवतिनतूक्तद्वयेपि।तेनएधामासेईक्षामासेइत्येवरूपमित्यपरे।कृभ्वितीति।यद्यपिकृञ्इत्युक्तौलाघवमस्तितथापिधातु

सुभयोर्ग्रहणं।निरनुबंधपरिभाषयालुग्विकरणाःलुग्विकरणेरितिपरिभाषयाच।नचसाहचर्यात्लुग्विकरणस्यैवग्रहणमितिशंक्यं।तस्यानित्यत्वात्।स्नुतेजने।
शीङ्स्वप्नेःसुप्रस्रवणे।णुस्तुतौ।ट्सुशब्दे।ट्ओष्णिगतिवृद्धौ॥।डीङ्विहायसागतौ।श्रिञ्सेवायां।वृङ्संभक्तौ।वृञ्वरणे।नन्वेतद्भिन्नानामेकाचामेवानुदात्तत्वेऊ
र्णुतःऊर्णुतवानित्यादिनसिध्येन्मैवं।ऊर्णोतेर्णुवद्भावोवाच्यःइतिवक्ष्यमाणवार्तिकेनेष्टसिद्धेः।अतएवऊर्णोनूयतेइत्यत्रधातोरेकाचइतियङ्।ऊर्णुनावेत्यत्रानेका
च्त्वेनप्रवृत्तस्याःमोःभावश्चसिध्यति।उक्तंचभाष्ये।वाच्यंऊर्णोर्णुवद्भावोयङ्प्रसिद्धिःप्रयोजनं।आगमश्चप्रतिषेधार्थमेकाचश्चेदुपग्रहादिति।विभाषागुणेऽस्त्रिया
मिति।हेतावियंपंचमीहेतुरिहफलं।एतच्चकैय्यटेस्पष्टं।उपग्रहःप्रतिषेधः।इदंप्रतिषेधार्थमित्यर्थः।एवंचणुवद्भावेनैकाच्त्वात्स्यकःकितीतिनिषेधप्रव
र्तेः।ऊर्णुतइत्यादिसिध्यति।एकाचउपदेशइतीन्निषेधस्तुनप्रवर्ततेणुवद्भावेनैकाच्त्वेप्यनुदात्तत्वाभावात्।ऊर्णुधातोर्णुधातोश्चउदात्तत्वात्।तथाचोर्णुविता
ऊर्णावीदित्याद्यपिसिद्धं।वसतिक्षुधामित्यादिप्राचांग्रंथस्यपाठमुपेक्ष्यहलंतेषुकादिक्रमेणाह शक्लृदृसृषृमृवृत्रिस्वरित्रसिचःषट्टुपचष्पाके।पचिर्व्यक्तीकरणे।ह्वावपिपचित्यनेनगृह्यते।रिचिर्विरेके।रिचिर्वियोजनसंपर्चनयोरितियोजादिकश्चगृह्यतेव
र्त्तिनेनतुवेचपरिभाषणेवृत्तोवर्तिरपि।वर्जिर्योजादिकोपिगृह्यते।क्लांतेषुप्रच्छेकः।जांतेषुत्यजनिर्जिरभ्रंजभंजभ्रस्जमस्जयजयुजरुजरजभजिर्
सृजमृजस्वजः पंचदशभुजिरित्यनेनभुजपालनाभ्यवहारयोः।भुजोकौटिल्ये।इतिचगृह्यते।युजिरित्यनेनयुजिर्योगे।युजसमाधावितिचगृह्यते।केचित्तुव्याघ्र
भूतिश्लोकेभाष्येचयुजिरित्येतत्युजिरयोगइत्यस्यैकदेशोत्थारणमित्याहुः।स्वन्यतेषुजसमाधौसेट्।सजिरित्यनेनतुस्वज्विसर्गेदिवादिस्तुदादिश्चगृह्यते।दांते
षु।अदसृदखिदछिदतुदनुदपद्यभिद्विद्यतिर्विनद्।शदसदस्यिस्कंदहदः पंचदशखिदिरित्यनेनखिददैन्येखिद्यतिः खिदतिः खिनतिश्चगृह्यते।विद्य
तीतिविदसत्तायां।विन्दतीतिविदसिध्य एकादश।रुधिरुधिर्आवरणे।अनोरुधकामेइतिदिवादिश्चगृह्यते।नांतेषुमन्यहनौह्वो।मनज्ञानेदिवादिः॥शांते
षुआप्—सिपक्लृपतपतिप्तप्यदृप्यलिष्लुपवृपशप्स्वप्सृपस्रुयोदश।सिपित्यनेनसिपप्रेरणेसिप्यतिः सिपतिश्चगृह्यते।क्लृपस्वर्शनेपित्यनेनतपसंतापेतपऐ रामः
श्वर्येदिवादिःतपदाहेइत्यपिणिजभावपक्षेगृह्यते।तिष्टृसृणे।तृप्यतिदृप्यत्योर्वैकल्पेप्यनुदात्तस्यचर्दुपधस्येत्यमर्योत्रपाठः।भांतेषुयभ्रस्भ्रलभस्भ्रयः।मांतेषुगमन १९

विचारणे।धान्तेषुक्रुधक्षुधबुध्यबंधमुधरुधराधग्यधमुधसाध २३

नचवार्णादांगंवलीयइतिवृद्धेःप्रागल्लोपएवस्या दितिशंक्यं।व्याश्रयत्वात्।वार्णादांगमितिपरिभाषायाअनित्यत्वाद्वा।तत्रहिश्नसोरल्लोपइतितपरकरणमेव
लिंगंयदिवृद्धेःप्रागेवाल्लोपःस्यात्तर्हिकिंतेनतपरकरणेनेति।यद्यपिवैदिकप्रक्रियायामानङ्आवःद्स्यादौकुंदस्यपिदृश्यतइत्याडागमस्यवक्ष्यमाणत्वात्तदर्थमाट्
सूत्रंकर्तव्यंतथाप्यारंविनैवअज्झत्यत्येनआङ्पूर्वकत्वेनवातत्रकथंचित्व्याख्येयमितिस्थितस्यगतिमाहुः।सलोपइतिलिङः सलोपोनंत्यस्येत्यनेना एधेयाताम्
ति।सीयुटः सलोपेआदुणः।एधिषीध्वमिति।इणः परत्वेपिइणंतादंगात्परत्वाभावादिणः षीध्वमितिढत्वेनभवति॥ ॥आत्मने।झोंतइत्यतोझइतिअदभ्यस्तादि

आत्मनेपदेष्वनतः।७।१।५॥अनकारात्परस्यात्मनेपदेषुझस्यअतइत्यादेशःस्यात्।ऐधिषत।ऐधिष्टाः।ऐधिषाथां।इणःषीध्वंलुङ्लिटान्धोङ्
क्षीत्।ऐधिढ्वम्।इड्भिन्नएवइणिहगह्यतेइतिमतेतु।ऐधिध्वं।ढधयोर्वस्यमस्यचद्वित्वविकल्पात्षोडशरूपाणि।ऐधिषि।ऐधिष्वहि।ऐधि
ष्महि।ऐधिष्यत।ऐधिष्येतां।ऐधिष्यन्त।ऐधिष्यथाः।ऐधिष्येथां।ऐधिष्यध्वम्।ऐधिष्ये।ऐधिष्यावहि।ऐधिष्यामहि।उदात्तलाद्लादेरिट्।प्रसङ्ग
दनुदात्ताःसंगृह्यन्ते।उदृदन्तैर्यौतिरुण्शीस्नुनुक्षुविडीङ्श्रिभिःवृङ्वृञभ्यान्नविनैकाचोऽजन्तेषुनिहत्ताःस्मृताः१शल्कपच्मु चरिच्वच्
विच्सिच्प्रच्छिक्त्यजनिर्जिभ्रजः।भञ्जभ्रस्जमसजियजयुजरुजरञ्जविजिरस्वञ्जिसञ्जसृजः२अदसुदखिदछिदुदिदःपद्यभिद्वि
द्यतिर्विनदशदसदीक्षिद्यतिःस्कन्दिस्विदीङ्क्रुधक्षुधिबुध्यतीङ३वध्यिर्य्युधिरुधीराधिव्यधशुधःसाधिसिध्यतीमन्यहन्याप्सिप्लुषिप्लुषितप्तिपस्त्
प्यतिदृप्यती४लियलुयवयशप्लुषप्सपियभ्रस्जभ्रंसनमुयमोरमिः।क्रुशिदृशिदिशीदृश्मृश्रिशरुश्लिश्विष्स्पृशःकृषिः॥५॥लिषत्तुष्
द्विषदुष्पुष्यषिषविषशिषशुषश्लिष्यतयोघसिः।वसतिर्दहदिहदुहोनह्मिहरुहलिहवहिस्तथा॥६॥अनुदात्ताहलन्तेषुधातवोद्व्यधिकं

त्यस्मात् अदिति चानुवर्ततेतदाह।झस्यात्स्यादिति। आत्मनेपदेषुकिं। अदंति। सुन्वंति। अनतः किं। एधंते। प्रबंते। इड्भिन्नएवेणिति। विभाषेटइतिइटोविशिष्यग्र
हणाद्वोवलीवर्दन्यायेनकैश्चिदिड्भिन्नएवेणिहगह्यतइतिभावः।ऊदृदंतैरिति।ऊदृदंतैर्विनायौत्यादिभिर्विनावृङ्वृञभ्यांचविनाअन्येयेषकाचोऽजंताःतेनिह
ताःअनुदात्तादित्यर्थः।तथाचादाताधाताचेतास्तोते त्यादिषुइणनभवति।ऊदंताःभूलूप्रभृतयः।ऋदंताःकृत्प्रभृतयः।युमिश्रणादौ।रुशब्दे।रुङ्गतिरेषणयोःरि

पदगतौ।षिधुसंराद्धौ।बुधअवगमे।मनज्ञाने।पुषपुष्टौ।श्लिषआलिंगने।वसनिवासे।एते अनिटः।युमिश्रणामिश्रणयोः।अयंसेट्।अमीतयेति।णिजिशुद्धौ।ओविजी भयचलनयोः।शकमर्षणे।दृत्येषांक्रमेणआदादिकतौदादिकदैवादिकानां व्याख्तयेसानुबंधानिर्दिष्टादृत्यर्थः।विंदतिरिति।विदिर्लाभे।इष्टइति।अनिङ्नेतिशेषः।भाष्यानुक्ताइति।भाष्यकृताऽनुक्ताः।ननुप्रत्याख्याताइति।नास्तीहतद्विरोधः।ततश्चव्याघ्रभूत्यादिग्रंथाउरोधात्सकृद्यष्टोक्तेननञ्विशिष्टेनानञ्दृत्यादिसौत्रप्रयोगादत्रुंप्रतिपत्तुमित्यादिसार्वलौकिकन्यवहाराच्चउपलक्षणतयैवभाष्येनेयमितिभावः।अकर्मकइति।अत्रकेचित्।अभिभवेच्छाधात्वर्थस्तथाचस्यद्धार्थकस्यसकर्मकतादृश्य

शर्पूर्वाः खयः।७।४।६१॥अभ्यासस्यशर्पूर्वाः खयःशिष्यन्ते।हलादिश्शेषइत्यस्यापवादः।पस्पर्द्धे।स्पर्द्धिता।स्पर्द्धिष्यते।स्पर्द्धितुं।अस्पर्द्धत।स्पर्द्धेत। स्पर्द्धिषीष्ट।अस्पर्द्धिष्ट।अस्पर्द्धिष्यत॥३॥गाधृप्रतिष्ठालिप्सयोर्ग्रन्थेच।गाधते।जगाधे॥४॥वाधृलोडने।लोडनंप्रतिघातः।वाधते॥५॥नाथृनाध्याञ्योपतापैश्वर्य्याशीःषु। आशिषिनाथइतिवाच्यं॥अस्याशिष्येवात्मनेपदंस्यात्।नाथते॥६॥अन्यत्रानाथति।नाधते॥७॥दधधारणे दधते॥ अतएकहल्मध्येऽनादेशादेर्लिटि॥६।४।१२०॥लिण्निमित्तादेशादिकन्नभवतियदङ्न्तदवयवस्यासंयुक्तहल्मध्यस्यस्याकारस्यएकारःस्याद्भ्यास लोपश्चकितिलिटि।थलिचसेटि।६।४।१२१॥प्राग्युक्तंस्यात्।आदेशश्चेहवैरूप्यसम्पादकएवाश्रीयते।शसिदधोःप्रतिषेधवचनात्ज्ञापकात्तेनप्रकृतिजश्चरान्तेषुसत्स्वपिएत्वाभ्यासलोपौस्तएव।देधदेधाते।देधिरे।अतःकिम्॥दिदिवतुः।तपरःकिम्।ररासे।एकेत्यादिकिम्।तत्तरतुः। अनादेशादेःकिम्।चकनतुः।लिटाआदेशविशेषणादिहस्यादेवानेमिथासेद्धे॥८॥स्कुदिआप्रवणे।आप्रवणमुत्स्रवनमुद्धरणञ्चाइदितोनुम्धातोः। ७।१।५८॥स्कुन्दते।चस्कुन्दे॥९॥ष्विदिस्विदेत्येअकर्मकः।ष्विन्दते।शिष्विन्दे॥१०॥वदिअभिवादनस्तुत्योः।वन्दते।ववन्दे॥११॥भदिकल्याणेसुखेच।

ते।आह्वास्मेएवमरावतींयेति उदाहरिष्यतेचस्यद्धार्थामाङ्इत्यत्रस्वयमेवाकृष्णश्चाणूरमाह्वयतेस्यद्धतइत्यर्थइति।श्रीहर्षोपिप्रायुंक्तातन्नासत्यपुरांतंवात्रेतास्यद्धितुमर्हतीति।अतोस्यसकर्मकत्वंन्याय्यमित्याहुः॥ ॥शर्पूर्वाः।अतदुणसंविज्ञानोऽयंवहुव्रीहिः।तेनशरोनशेषः।किंतुखयामेवाद्दृहस्यर्द्धइत्यत्रेरेफस्यापिद्वित्वंभवतिद्वितीयस्यैकाचःसंबंधिरेफस्यैवनन्द्राइतिनिषेधादितिवोध्यं।गाधऋकारोनाम्नोपिशास्दित्तामितिनिषेधार्थः।अजगाधत्।आस्यदस्यापनाअवस्थानंवात्र

म्यमरमश्वत्वारः।शांतेषुकृशदंशदिशदृशमृशरिशरुशलिशविशस्पृशोदशारिशरुशहिंसायां।लिशित्यनेनलिशअल्पीभावेदिवादिःलिशगतौतुदादिश्चगृह्य
ते॥शांतेषुकृषत्विष्तृषहिषदुषपुष्यपिष्विषशिषशुषश्लिष एकादश।कृषितिभ्वादिकतौदादिकौगृह्यते।विषित्यनेनविक्लव्यात्तौ।जिषविषमिषितिदंडकस्थो
पिगृह्यते।शिषित्यनेनतुशिक्षविशेषणेकषखषशिषेतिदंडकस्थश्चगृह्यते।विषितिविक्लव्याप्तावितिजौहोत्यादिकएवगृह्यतेनतुदंडस्थः।शिषित्यनेनापिषिक्ल
